# संस्कृत सौरभम्

( ग्यारहवीं कक्षा के लिए )

[ निर्धारित संस्कृत पाठ्य-पुस्तक ]

## पंजाब स्कूल शिक्षा बोर्ड

साहिबज़ादा अजीत सिंह नगर

© पंजाब स्कूल शिक्षा बोर्ड

**प्रथम संस्करण : 2005..........25000 प्रतियाँ**

All rights including those of translation, reproduction, annotation etc. are reserved by the Punjab School Education Board.


| | | |
|---|---|---|
| लेखक | : | श्री वेद प्रकाश शास्त्री |
| | | श्री वीरेन्द्र कुमार शर्मा |
| | | श्री पवन कुमार शास्त्री |
| संशोधक | : | प्रो. इन्द्र मोहन सिंह |
| | | श्री मदन गोपाल शर्मा |
| संयोजिका | : | श्रीमति सरोज आर्य |


**चेतावनी**

1. कोई भी एजेंसी-होल्डर अधिक पैसे लेने के उद्देश्य से पाठ्य-पुस्तकों पर जिल्दबन्दी नहीं कर सकता। (एजेंसी-होल्डरों के साथ हुए समझौते की धारा नं. 7 के अनुसार)
2. पंजाब स्कूल शिक्षा बोर्ड द्वारा मुद्रित तथा प्रकाशित पाठ्य-पुस्तकों का जाली प्रकाशन, स्टॉक करना, जमाखोरी या बिक्री आदि करना भारतीय दंड प्रणाली के अन्तर्गत गैरकानूनी है।
(पंजाब स्कूल शिक्षा बोर्ड की पाठ्य-पुस्तकें बोर्ड के 'वाटर मारक' वाले कागज़ पर ही मुद्रित की जाती हैं।)

**मूल्य : 12.00 रुपये**

**सचिव,** पंजाब स्कूल शिक्षा बोर्ड, विद्या भवन फेज़-8 साहिबज़ादा अजीत सिं[illegible] नगर 160062 द्वारा प्रकाशित तथा के.सी. प्रिंटिंग एंड एलाइड वर्क्स, मथुरा द्वा[illegible] मुद्रित।

# प्राक्कथन

पंजाब स्कूल शिक्षा बोर्ड का प्रमुख उत्तरदायित्व स्कूल स्तरीय सभी विषयों के पाठ्यक्रम तैयार करना, उन पाठ्यक्रमों के अनुसार पाठ्य-पुस्तकें तैयार करना तथा उन्हें नवीन शिक्षा नीति के अनुसार संशोधित करना है। संशोधित पाठ्यक्रमों के आधार पर विभिन्न विषयों की पाठ्य-पुस्तकें तैयार की जा रही हैं। इसी कार्यक्रम के अन्तर्गत प्रवेश वर्ष 1998 से संस्कृत विषय की सभी पाठ्य-पुस्तकों के नवीनीकरण की क्रमिक योजना बनाई गई है।

छठी, सातवीं, आठवीं, मैट्रिक श्रेणियों की पाठ्य-पुस्तकों का नवीनीकरण पहले ही क्रमशः किया जा चुका है। हस्तीय पुस्तक इसी शृंखला की अगली कड़ी है। यह पुस्तक प्रवेश वर्ष 2005 से ग्यारहवीं श्रेणी के लिए संशोधित ाठ्यक्रम के अनुसार तैयार की गई है। पुस्तक को विद्यार्थियों के मानसिक तरानुरूप बनाने का यथेष्ट प्रयत्न किया गया है? विद्यार्थियों की सुविधा के लए पाठ्यक्रम में निर्धारित व्याकरण तथा अनुवाद भाग को पाठ्य-पुस्तक ं सम्मिलित किया गया है।

आशा की जाती है कि यह पुस्तक विद्यार्थियों तथा अध्यापकों के लिए ाभदायक सिद्ध होगी। फिर भी, पुस्तक को और अधिक लाभदायक बनाने के लिए द्वानों द्वारा दिए गए सुझाव, बोर्ड द्वारा सादर स्वीकार किए जाएंगे।

**प्रधान**

पंजाब स्कूल शिक्षा बोर्ड

# विषय-सूची


| क्रमांक | विषय | पृष्ठांक |
|---|---|---|
| प्रथम: पाठ: | प्रार्थना | 1 |
| द्वितीय: पाठ: | भाग्यस्योदय: | 3 |
| तृतीय: पाठ: | श्री गुरु: अर्जुनदेव: | 7 |
| चतुर्थ: पाठ: | वेदानां महत्त्वम् | 10 |
| पञ्चम: पाठ: | भर्तृहरि-वचनानि | 13 |
| षष्ठ: पाठ: | गौरसिंहस्य दौत्यम् | 16 |
| सप्तम: पाठ: | विज्ञानाचार्य: श्रीरमण: | 19 |
| अष्टम: पाठ: | भोजराज:-पुनर्जीवित: | 22 |
| नवम: पाठ: | चाणक्य वचांसि | 25 |
| दशम: पाठ: | सोमप्रभा-परिणय: | 28 |
| एकादश: पाठ: | राष्ट्रिय-कैडेट-कोर: | 32 |
| द्वादश: पाठ: | महर्षि: दयानन्द: | 35 |
| त्रयोदश: पाठ: | निश्चयं दर्शयति लक्ष्यम् | 37 |
| चतुर्दश: पाठ: | सुभाषितानि | 40 |
| पञ्चदश: पाठ: | सुभाष-चन्द्र-बोस: | 43 |
| षोडश: पाठ: | संस्कृतस्य गौरवम् | 46 |
| सप्तदश: पाठ: | लाला लाजपतराय: | 49 |
| अष्टादश: पाठ: | सिंह: पंजराद् बहिर्गत: | 51 |
| नवदश: पाठ: | वसन्तसेना-हृदयम् | 54 |
| विंश: पाठ: | मालविकाग्निमित्रम् | 58 |
| **व्याकरण भाग** | | 71 |
| **अनुवाद भाग** | | 122 |

### प्रथमः पाठः

# प्रार्थना

भगवन्, त्वदीय-भक्तिं न कदापि विस्मरेयम्।
निज-देश-जाति-सेवा-सक्तः सदा भवेयम्॥
भगवन्, त्वदीय-भक्तिं न कदापि विस्मरेयम्॥

जायेत जातु नो मे परपीडनाभिलाषः।
दीने सहाय-हीने सततं, प्रभो द्रवेयम्॥
भगवन्, त्वदीय-भक्तिं न कदापि विस्मरेयम्॥

प्रीतिः सदा स्वदेशे रतिरस्तु नैज-वेषे।
गुरु-पादयोः निदेशे स्वमनः प्रवर्त्तयेयम्॥
भगवन्, त्वदीय-भक्तिं न कदापि विस्मरेयम्॥

कुरुते सदा विनीतो विनयं, कृपैकसिन्धो!
गुरु-मातृ-पितृ-सेवा-करणे वयो नयेयम्॥
भगवन्, त्वदीय-भक्तिं न कदापि विस्मरेयम्॥

न, विभो, परापवादे समुदेतु मेऽनुरागः।
परकीय-वित्त-भागं मनसाऽपि नो हरेयम्॥
भगवन्, त्वदीय-भक्तिं न कदापि विस्मरेयम्॥

### शब्दार्थ

**विस्मरेयम्** = (वि√स्मृ, विधिलिङ्, उ० ए०) भूलूँ
**जायेत** = उत्पन्न हो
**जातु** = (अ०) कभी, कभी भी
**नैज-वेषे** = अपनी पोशाक में
**सततम्** = (क्रि० वि०) सदा, निरन्तर
**द्रवेयम्** = (√द्रु० विधिलिङ्, उ० ए०) पिघलूँ
**रतिः** = प्रेम
**वयः** = आयु को, जीवन-काल को
**प्रवर्त्तयेयम्** = प्रवृत्त करूँ, लगाऊँ

**निदेशे** = आज्ञा में **नयेयम्** = (√नी, विधिलिङ्, उ० ए०) व्यतीत करूँ

**कृपैकसिन्धो** = हे कृपा के सागर

## अभ्यास

1. **हिन्दी में उत्तर दो**

(क) छात्र ईश्वर से क्या प्रार्थना करता है ?

(ख) छात्रों को अपना मन किसमें लगाना चाहिए ?

(ग) हमें किस से प्रीति करनी चाहिए ?

2. **नीचे लिखे शब्दों में से उचित शब्द चुनकर रिक्त स्थान भरें**

(विनयं, प्रभो, कदापि, द्रवेयं, सदा)

1. भगवन् त्वदीय-भक्तिं न-----विस्मरेयम्।
2. दीने सहाय-हीने सततं ------द्रवेयम्।
3. कुरुते सदा विनीतो------कृपैकसिन्धो।
4. निजदेश-जाति-सेवा-सक्तः-------भवेयम्।

3. **सन्धिच्छेद करो**

परापवादे, मनसाऽपि, कदापि, कृपा+एकः रतिः+ अस्तु, मे + अनुरागः

❀❀❀

## द्वितीयः पाठः

# भाग्यस्योदयः

कस्मिश्चित् ग्रामे एकः काष्ठवाहकः अवसत्। सः प्रतिदिनम् कुठारेण काष्ठानि छित्त्वा नगरमागच्छति स्म। काष्ठानां च विक्रयं कृत्वा सः निर्वाहमकरोत्। सः निरन्तरं यतते स्म, परं गृहे दारिद्रयस्य एव सर्वत्र प्रकोपः आसीत्। तस्य शिशूनां पार्श्वे वस्त्राणां अभावः एव आसीत्। कदाचित् ते पूर्णं भोजनमपि न लभन्ते स्म।

एकदा आकाशे सर्वत्र मेघाः आसन्। शीतलः अनिलः वहति स्म। मेघेभ्यः जलस्य बिन्दवः पतन्ति स्म। सः काष्ठवाहकः वनं गन्तुमुद्यतः अभवत्। तदा पत्नी तं कथितवती- ''प्रिय, अधुना काष्ठेभ्यः वनं न गच्छ। पश्य, आकाशे सर्वत्र कृष्णाः मेघाः सन्ति। मेघेभ्यः जलस्य बिन्दवः पतन्ति। शीघ्रमेव वृष्टि तीव्रा भविष्यति। त्वया तु नद्याः मध्यात् वनं प्रति गन्तव्यम्। नद्याः उपरि तु सेतुः अपि नास्ति। यदि जलस्य वेगः अधिकः भविष्यति, तर्हि नद्याः पारे सेतुं विना कथं गमिष्यसि, कथं च पुनः आगमिष्यसि ?''

काष्ठवाहकः अवदत्—''प्रिये, चिन्ता नैव करणीया। मनुष्येणोद्यमः करणीयः फलं तु भगवान् दास्यति। यः यतते सः स्वस्य यत्नस्य फलम् लभते एव। अहं तु यतिष्ये, नद्याः पारं च येन केनाप्युपायेन, यया कयापि च युक्त्या गमिष्यामि। सिद्धिः भविष्यति एव।''

पत्नी अकथयत्- ''प्रिय, पश्यामि यत् ये सर्वदा शक्त्याऽपि यतन्ते, तेऽपि दरिद्राः एव तिष्ठन्ति। तेषां गृहे न भोजनं भवति, न च अपेक्षितवस्त्राणि। पश्य खलु निजस्य गृहस्यैव दशाम्। एतादृशाः अपि जनाः मया दृष्टाः ये किंचिदपि न यतन्ते तथापि सर्वं लभन्ते। तेषां समीपे अनेके सेवकाः भवन्ति, ये अहर्निशं तान् सेवन्ते। ते तु बिना परिश्रममेव मोदन्ते, यशः, सौख्यं धनं च लभन्ते। अतः भाग्यमेव बलवत्। अद्य वृष्टेः कालः अस्ति। अतः वनं न गच्छ। अत्रैव च तिष्ठ।''

काष्ठवाहकः अवदत्-''प्रियेऽहम् स्वयं कर्त्तव्यं न त्यक्ष्यामि। काष्ठान्याहर्तुमवश्यमेव गमिष्यामि।'' इति कथयित्वा सः कुठारं गृहीत्वा वनं प्रत्यचलत्।

तदैव तीव्रायाः वृष्टेः कारणात् नद्यामधिकं जलमभवत्। काष्ठवाहकः एकया नौकया नद्याः पारमगच्छत्। वनं प्राप्य कुठारेण सः काष्ठानि छेतुमुद्यतः अभवत्। तदैवैकम्

दिव्यपुरुषं सः अपश्यत्। तं दृष्ट्वा काष्ठवाहकः अवदत्- "देव, नमामि त्वाम्।"

दिव्यपुरुष :- भोः मानव, वृष्ट्यामपि त्वं वने कस्य हेतोः आगतः असि?

काष्ठवाहकः- देव, अहं दरिद्रः अस्मि। निजाय परिवाराय सर्वाणि कष्टानि सहे, अहर्निशं यते, परं पर्याप्तं धनं नैव लभे। एषः कुठारः मम सहायकः अस्ति। एतेन कार्यं करोमि। वृष्ट्यामपि कार्याय आगतः अस्मि।

दिव्यपुरुषः- अरे काष्ठवाहक, अहं कुबेरस्य सेवकः। एतस्मिन् एव वने तत्र आश्रमे वसामि। त्वं तत्र मम सेवां कुरु। यदि शक्त्या सेविष्यसे तर्हि फलमपि लप्स्यसे, मोदिष्यसे च।

काष्ठवाहकः- मम पत्नी मां विना व्याकुला भविष्यति। तस्यै केन विधिना सूचनां दास्यामि?

दिव्यपुरुष :- चिन्तां न कुरु। दिव्यया शक्त्या तस्याः समीपे सूचना गमिष्यति।

काष्ठवाहकः-तर्हि आज्ञां करोतु भवान्। अहं सर्वथा भवन्तं सेविष्ये।

दिव्यपुरुषः- यदि एवं तर्हि मया सह आगच्छ। सेवया तव भाग्यस्य उदयः भविष्यति।

काष्ठवाहकः दिव्यपुरुषेण सह अचलत्।

दिव्यपुरुषस्याश्रमः एकस्मिन् गिरौ रम्ये स्थाने आसीत्। सः काष्ठवाहकेन सह तत्र प्राप्तः। दिव्यपुरुषः तमवदत्- "भोः काष्ठवाहक! पश्य एषः मम आश्रमः। एतस्मिन् आश्रमे वृक्षाः सदा फलन्ति। समीपमेव तत् निर्मलम् स्रोतः अस्ति। स्रोतसि स्वच्छं शुद्धं च सलिलम् अस्ति। तत् एव जलं वयमाश्रमवासिनः पिबामः। एते ये तरवः तत्र दिव्यैः फलैः शोभन्ते, ते कल्पवृक्षाः। कल्पवृक्षाः अस्माकं सर्वाः इच्छाः पूर्णाः कुर्वन्ति। त्वं प्रतिदिनं तस्मात् स्रोतसः पातुं जलम् कल्पवृक्षेभ्यः चाभीष्टानि वस्तूनि आनेष्यसि। आश्रमे स्वच्छता-कार्यमपि त्वया एव करणीयम्। एतत् कार्यं कृत्वा त्वं यथेच्छं विश्रामं करिष्यसि।"

काष्ठवाहकः- देव, भवतः आदेशानुसारं सर्वं कार्यं करिष्यामि। यतिष्ये यत् सर्वे आश्रमवासिनः सन्तुष्टाः सन्तु। यस्मै कस्मै अपि यत् यत् आवश्यकम् भविष्यति, तत् सर्वम् करिष्यामि। गिरौ अत्र भवतां सेवया सर्वं सुखं लप्स्ये, नास्त्यत्र संशय :।

तस्मात् दिनात् काष्ठवाहकः दिव्यपुरुषस्याश्रमे सेवामकरोत्। यथा आश्रमवासिनः

कथयन्ति स्म, तथैवासौ तान् सेवते स्म। सः तेभ्यः सर्वाणि कष्टान्यपि सहते स्म। तत्र सः विविधानि फलानि भोज्यानि च लभते स्म। दिव्यपुरुषः तस्य परिधानाय नूतनानि वस्त्राण्ययच्छत्। तानि धारयित्वा सः मोदते स्म। एवं तस्य कालः सुखेन गच्छति स्म।

एकदा काष्ठवाहकः दिव्य-पुरुषं अवदत्, ''देव, चिरकालात् अहं भवतां सर्वेषामाश्रमवासिनां सेवायै अत्र गिरावेव तिष्ठामि। मम गृहस्य का दशा इति मे ज्ञानं नास्ति। अहमधुना गृहम् गन्तुमिच्छामि।''

दिव्यः पुरुषः-''भद्र, यथेच्छम् गच्छ। वयं तव सेवया प्रसन्नाः स्मः। परिश्रमेण सेवया च तव भाग्यस्योदयः भूतः। अधुना त्वं सुपरीक्षितः अप्यसि। एतं दिव्यं घटं सह नय। एतस्मात् घटात् यथेच्छं वस्तूनि लप्स्यसे। परं ध्यानं कुरु यत् कदापि मद्यपानादिषु व्यसनेषु मतिं न करिष्यसि। तदैव ते सौख्यं भविष्यति।'' इति कथयित्वा सः तस्मै एकं दिव्यं घटमयच्छत्।

काष्ठवाहकः घटं प्राप्य गृहम् गतवान्। तस्य पत्नी भर्तुः भाग्यस्योदयं दृष्ट्वा मुदिताऽभवत् अकथयत् च -''परिश्रमस्य फलं तु मनुष्यः लभते, परं चिरात्। परिश्रमिणां भाग्यस्योदयः तु भवत्येव। अहं केवलं भाग्यमेव प्रशंसितवान् तत् नोचितम् आसीत्। अधुना पश्यामि यत् भवान् परिश्रमेणैव सिद्धिम् प्राप्तवान्। ''

अधुना काष्ठवाहकस्य दारिद्र्यं दूरम् अभवत्। सः परिवारे सुखेनावसत्।

## शब्दार्थ

| | |
|---|---|
| काष्ठवाहकः = लकड़हारा | संशयः = सन्देह |
| सिद्धिः = सफलता। | असौ = वह |
| कुबेर : = धन का देवता। | छेत्तुम् = काटने को। |
| कुठारः = कुल्हाड़ा। | दिव्यपुरुषः = देवता |
| कृष्णाः = काले। | छित्वा = काटकर |
| अहर्निशम् = रात-दिन | बिन्दुः = बूँद। |
| आहर्तुम् = लाने को। | सेतुः = पुल |
| स्रोतः = चश्मा। | काष्ठम् = लकड़ी। |
| अमी = वे। | परिधानम् = पहनावा |

## अभ्यास

1. प्रश्नों के हिन्दी में उत्तर दो-

(क) लकड़हारे के घर की दशा कैसी थी ?

(ख) उसने वन में क्या देखा ?

(ग) कल्प वृक्षों की क्या उपयोगिता है ?

(घ) आश्रमवासी कहाँ से जल पीते थे ?

2. संस्कृते उत्तरं लिखत-

(क) काष्ठवाहकस्य उपकरणं किम् आसीत् ?

(ख) आकाशे के आसन् ?

(ग) दिव्यपुरुषस्याश्रमः कुत्र आसीत् ?

3. नीचे लिखे शब्दों में से उचित शब्द लेकर खाली स्थान भरो-

(नौकया, काष्ठवाहकः, कार्यम्, दिव्यम्, करणीया )

(क) ग्रामे एकः -------अवसत्।

(ख) चिन्ता नैव------।

(ग) काष्ठवाहकः एकया----नद्याः पारमगच्छत्।

(घ) एतं----घटं सह नय।

4. यथानिर्दिष्ट परिवर्तन करें।

(क) सः काष्ठानां विक्रयं कृत्वा निर्वाहम् अकरोत्। (उत्तमपुरुष में)

(ख) आकाशे सर्वत्र मेघाः आसन्। (लट् लकार)

(ग) जलस्य बिन्दवः पतन्ति । (एकवचन)

5. सन्धि/सन्धिच्छेद करो।

गन्तुम् + उद्यताः , मनुष्येण + उद्यमः, भाग्यम् + एव।

काष्ठान्याहर्तुम्, गिरावत्र, अप्यसि।

## तृतीयः पाठः

# श्रीगुरुः अर्जुनदेवः

पञ्चमगुरोः श्रीमतः अर्जुनदेवस्य जन्म अमृतसर-मण्डलस्य गोयन्दवालग्रामे 1563 तमे ईसाब्दे अप्रैलमासस्य पञ्चदशतारिकायां श्रीगुरोः रामदासस्य गृहे अभवत्। बाल्याद् एव स धर्मरुचिः गुरुभक्ति-सेवाऽहिंसा-त्यागादिभिः चः गुणैः युक्तः आसीत्।

गुरुरामदासः अमृतसरोवरस्य निर्माणाय यत् कार्यमारभत तत् गुरु-अर्जुनदेवः अपूरयत् सरोवरमध्ये च भव्यं हरिमन्दिरं निरमापयत्। एतस्य हरिमन्दिरस्य चत्वारि द्वाराणि चतुर्वर्णानां समन्वय-भावं प्रकटयन्ति। श्रीगुरुः मीयांमीरनाम्ना सूफीपीरेण सरोवरस्य अस्य शिलान्यासम् अकारयत्। अनेन तस्य सर्वेषु धर्मेषु समदृष्टिः सूच्यते। धर्मकार्यरतः अयं गुरुः सन्तोषसर-रामसरादीनि अन्यानि सरांसि अपि निर्मापितवान्।

श्रीगुरुग्रन्थस्य सम्पादनं पञ्चमगुरोः विशिष्टतमम् अमूल्यं च कार्यं वर्तते। परमोदारतया तेन आदिग्रन्थे गुरु-वाणीभिः सह हिन्दु-मुस्लिम-महात्मनां वाण्यः अपि संगृहीताः। यदाऽयं महान् ग्रन्थः सम्पूर्णः अभवत् तदा 1604 तमे ईसाब्दे स इमं ग्रन्थं हरिमन्दिरे विधिपूर्वकं संस्थापितम् अकरोत्।

'द्विषन्ति मन्दाश्चरितं महात्मनाम्,' इत्युक्त्यनुसारं प्रतिदिनं वर्धमानं श्रीगुरोः महिमानं वीक्ष्य पृथ्वीचन्द-सुल्लीखानादयः दुर्मतयः तस्य वैरिणः अभवन्। पृथ्वीचन्दस्तु कूटं कृत्वा श्रीगुरोः नवजातं शिशुं हरगोबिन्दं घातयितुं प्रायतत, परं साफल्यं नालभत।'

सम्राजः अकबरस्य पंजाब-यात्रावसरे इमे द्वेषिणः 'अर्जुन देवः हिन्दु-मुस्लिम-धर्मयोः विरोधी अस्ति, गुरुग्रन्थे च उभयोः निन्दा विद्यते'—इति तं सूचितवन्तः। एतच्छ्रुत्वा अकबरः श्रीगुरुः सदसि उपस्थातुम् आदिशत्। परं श्रीगुरुः बाबाबुड्ढाभाईगुरुदासौ तत्र प्रैषयत्। सम्राट् अकबरः ताभ्यां श्रीगुरुग्रन्थात् पठिताम् ईशस्तुतिपराम् अन्य-मत-निन्दारहितां च गुरु-वाणीं श्रुत्वा श्रीगुरुग्रन्थं प्रति श्रद्धावान् अभवत्, लवपुरतः प्रत्यागमनकाले च श्रीगुरुं द्रष्टुम् इच्छां प्राकटयत्।

यथावसरं गोयन्दवालग्रामं प्रत्यागतः सम्राट् श्रीगुरुदर्शनेन कृतार्थः तं कमपि सेवावसरं प्रार्थयत। निष्कामः श्रीगुरुस्तु वर्षाभावात् संकटग्रस्तेभ्यः कृषकेभ्यः तं भूमि-कर-मुक्तिम् अयाचत। अकबरेण सहर्षम् इदम् स्वीकृतम्। अनन्तरं स जाति-पंक्ति-निर्विशेषं सहभोजं [लङ्गरं] निरीक्ष्य भृशम् अमोदत।

अकबरस्य मृत्योः अनन्तरं जहांगीरः राजासनं प्राप्तवान्। अचिरेण जहांगीर पुत्रः खुसरो राजविद्रोही अजायत। पितरं प्रति स्वविद्रोहस्य विफलतायां सत्यां रक्षार्थं पलायमानः खुसरो विपाशानदीमुत्तीर्य श्रीगुरोः शरणमागतः।

अकबर-पौत्रं तं स्वशरणार्थिनं ज्ञात्वा श्रीगुरुः तस्मै आशीर्वादम् अददात्। पृथ्वीचन्दादयः गुरुद्वेषिणः क्रोधानलदह्यमानाय सम्राजे जहांगीराय वृत्तान्तमिदं निवेद्य "गुरुः अर्जुनदेवः खुसरोकृते विद्रोहे तस्य सहायकः आसीत्" इति तस्य कर्णे अजपन्। एतद् श्रुत्वैव सम्राट् "श्रीगुरोः बन्धनं, सर्वस्वहरणं प्राणहरणं च विधेयम्" इति पंजाब-शासकं मुरजीदखानम् आदिशत्।

'अङ्गीकृतं सुकृतिनः परिपालयन्ति' इत्युक्तिम् अनुसरन् श्रीगुरुः स्वधर्मे निधनम् अपि श्रेयस्करम् अमन्यत्। धर्मान्धः पंजाब-शासकः मुरजीदखानः श्रीगुरुम् अकल्पनीयाभिः यातनाभिः अपीडयत्। परन्तु सुतप्त-जल कटाहे प्रक्षेपणं, संतप्तायसि उपवेशनम् अत्युष्णबालुकाभिः शरीरतापनम् अपि च श्रीगुरुं पथभ्रष्टं कर्तुं न अशक्नुवन्। प्रत्युत स एताः यातनाः लीलया एव असहत। अन्ततः 1606 तमे ईसाब्दे मईमासस्य त्रिंशत्तमायां तारिकायां लवपुरनगरे धर्मरक्षावेद्याम् आत्मानं हुत्वा गुरुवदान्यः अयं महाज्योतिर्लीनः अभवत्।

## शब्दार्थ

धर्मरुचिः = धर्म में रुचि रखने वाला
समन्वय-भावः = एकता का भाव
दूरदेशेभ्यः = दूर-दूर के स्थानों से
संकलितवान् = (सम् √कल् +क्तवतु) एकत्र किया
द्विषन्ति = द्वेष करते हैं, वैर रखते हैं
मन्दाः = नीच लोग
चरितम् = जीवन को
कूटम् (नपुं॰) = षड्यन्त्र, साजिश
नवजातं शिशुम् = नन्हें बच्चे को
घातयितुम् = (√हन्, णिच्, तुमुन्) मरवाने के लिए, वध करवाने के लिए
शिलान्यास = नींव-पत्थर रखना
औदार्यम् = उदारता, हृदय की विशालता
जाति-पंक्ति निर्विशेषम् (क्रि॰ वि॰ - जहां जाति की पंक्ति का ध्यान न रखा जाए अर्थात् जाति-भेदभाव से रहित
विपाशानदी = व्यास नदी
क्रोधानल दह्यमान = क्रोध रूपी आग से जलाए जा रहे
अजपन् = कह दिया
सर्वस्व-हरणम् = सारी जायदाद जब्त कर लेना, सम्पत्ति छीन लेना

श्रद्धावान् = श्रद्धा से युक्त
प्रत्यागतः = (प्रति + आगतः) लौट कर आया हुआ

कटाहे = कड़ाहे में
संतप्तायसि = (संतप्त + अयसि) तपे हुए गर्म लोहे पर
लीलया = हंसते हुए, खुशी के साथ

## अभ्यास

1. निम्नलिखित प्रश्नों के उत्तर हिन्दी में लिखें :
   (क) श्रीगुरु अर्जुनदेव जी का जन्म कब और कहाँ पर हुआ?
   (ख) गुरु अर्जुन देव जी ने कौन-कौन से सरोवर बनवाए?
   (ग) पंचम गुरु ने श्री गुरु ग्रन्थ का सम्पादन कैसे किया?
   (घ) पंजाब के नवाब ने गुरु जी को क्या यातनाएँ दी?
2. संस्कृते उत्तरं लिखत-
   (क) श्रीगुरुः अर्जुनदेवः कुत्र अजायत?
   (ख) पञ्चमगुरुः अमृतसरोवरस्य मध्ये किं निरमापयत्?
   (ग) महात्मनां चरितं के द्विषन्ति?
3. नीचे दिए गए शब्दों में से उचित शब्द चुनकर रिक्त स्थानों की पूर्ति करें -
   (राजासनं, लीलया, सुकृतिनः, सेवावसरं, सम्पादनम्)
   (क) श्रीगुरु-ग्रन्थस्य------पञ्चमगुरोः विशिष्टं अमूल्यं च कार्यं वर्तते।
   (ख) अकबरस्य मृत्योः अनन्तरं जहांगीरः ------प्राप्तवान्।
   (ग) अंगीकृतं --------परिपालयन्ति।
   (घ) सः एताः यातनाः ----एव असहत।
4. यथा निर्दिष्ट परिवर्तन करें :-
   (क) सः सहभोजं निरीक्ष्य भृशम् अमोदत। (उत्तम पुरुष में)
   (ख) श्रीगुरुः तस्मै आशीर्वादम् अयच्छत्। (लट् लकार में)
   (ग) सः एताः यातनाः लीलया एव असहत। (बहुवचन में)
   (घ) अयं महाज्योतिर्लीनः अभवत्। (स्त्रीलिंग में)
5. सन्धि/सन्धिच्छेद करें।
   अत्रैतत्, गुणैः + च, इति + उक्ति, एतच्छ्रुत्वा, यदाऽयम्, मन्दाः + चरितम्।

## चतुर्थः पाठः

# वेदानां महत्त्वम्

वेदस्य कः अर्थः ? ज्ञानम् एव वेदस्य अर्थः। वेदाः ज्ञान-राशित्वात् शाश्वताः स्थायिनः च सन्ति। वेदाः भेदभाव रहिताः, मानवहित प्रतिपादकाः, विविध-ज्ञान-विज्ञान-राशयः, संस्कृतेः आधार रूपाः, कर्त्तव्य-अकर्त्तव्य अवबोधकाः, शुभ-अशुभ निदर्शकाः, जीवनस्य उन्नायकाः, सुखशान्ति साधकाः, चतुर्वर्ग-प्राप्तये सोपान-स्वरूपाश्च सन्ति।

वेदाः चत्वारः सन्ति-ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च। इमे वेदाः आचार-संहिता-रूपेण स्वीक्रियन्ते। एतेषु भारतीय-संस्कृतेः मूलरूपं, जीवन-दर्शनं, आचार-विचाराः, नैतिकं, सामाजिकं चरितं च प्राप्यते। आर्याणां यज्ञेषु दृढविश्वासः, एकेश्वरवादः, ईश्वरस्य सर्वव्यापकत्वम्, ज्ञानकर्मणोः समन्वयः, भौतिक-पदार्थानां त्यागः शरीरस्य नश्वरता, जीवस्य नित्यता, पुनर्जन्मनि विश्वासः अपि अत्र दृश्यते।

वेदेषु बीजरूपेण दार्शनिक-सिद्धान्ताः, राजनीतिः, समाजशास्त्रं, अध्यात्मं, मनोविज्ञानं, आयुर्वेदः, गणितं, अर्थशास्त्रं, नाट्यशास्त्रं, काव्यशास्त्रं, ज्योतिषशास्त्रं, विज्ञानं, वास्तुशास्त्रं, कर्मकाण्डं अन्ये च विविधाः विषयाः दृश्यन्ते। अस्मिन् विषये महर्षिदयानन्दः कथयति- ''वेदः सर्वासां सत्यविधानां पुस्तकं अस्ति। वेदस्य पठनं पाठनं श्रवणं श्रावणं च सर्वेषां आर्याणां परमो धर्मः।''

आचार-शिक्षा-दृष्ट्या, नैतिक-दर्शन रूपेण च वेदानां अतीव महत्त्वं वर्तते। कर्त्तव्य-उद्बोधन-रूपेण तेषां परमं प्रामाण्यं अस्ति। अभिवादनाय वेदेषु 'नमस्ते' इतिः व्यवहृतम्। अस्यार्थः-अहं त्वां नमामि सम्मानयामि वा। किं कर्म, किं अकर्म इत्यस्य समाधानार्थं वेदाः आदर्शरूपं उपस्थापयन्ति।

समाजशास्त्रीय दृष्ट्या अपि वेदा अतिमहत्त्वपूर्णाः सन्ति। समाजस्य विकासस्य, सामाजिक व्यवस्थायाः, सभ्यतायाः समुन्नतेः च महत्त्वपूर्णं ज्ञानं वेदेषु प्राप्यते।

वेदेषु राज्ञः प्रजायाः च कर्माणि, राजतन्त्रस्य विविधं स्वरूपं, राज्ञः निर्वाचनं, सभायां समितेः च स्थापना, मन्त्रिपरिषदः मनोनयनं चयनं वा, राजतन्त्रीया प्रजातंत्रीया च शासनव्यवस्था, शत्रु-संहारः, दण्डप्रयोगः अपि दृश्यते।

यतः ऋग्वेदः विश्वस्य प्राचीनतमः ग्रन्थः स्वीक्रियते, अतः भाषायाः प्राचीनतमं रूपं अपि अत्र दृश्यते। तुलनात्मक-अध्ययनाय अस्य ज्ञानं महत्त्वपूर्णम्। वैदिक-लौकिक-संस्कृत-ज्ञानार्थं अपि वेदानां पठनम् अनिवार्यम्।

वेदार्थस्य ज्ञानाय वेदस्य षड् अंगानि वर्तन्ते। तेषां नामानि-शिक्षा, कल्पः, निरुक्तं, छन्दः, ज्योतिष्, व्याकरणं च। एतेषां महत्त्वं ज्ञात्वा एव महर्षिः पाणिनिः उवाच- ''छन्दः वेदस्य पादौ, कल्पः हस्तः, ज्योतिष् चक्षुः, निरुक्तं श्रोत्रं, शिक्षा घ्राणं, व्याकरणं च मुखं ज्ञातव्यम्।

एवं वेदानां अध्ययनं न केवलं ज्ञानं विस्तारयति अपितु जीवनं पावयति, लोकानां विविधाः समस्याः निवारयति, जीवनं उन्नमयति, सद्भावान् च प्रेरयति। ''माता भूमिः पुत्रोऽहं पृथिव्याः'' इति एतैः शब्दैः मातृभूमेः सेवार्थं रक्षार्थं आत्मोत्सर्गाय चापि वेदः आदिशति। एवं वेदानां महत्त्वं पूर्णरूपेण सिध्यति।

## शब्दार्थ

शाश्वताः = सनातन, नित्य
अवबोधकाः = ज्ञान कराने वाले
उन्नायकाः = ऊपर उठाने वाले
सोपानम् = सीढ़ी
आर्याणाम् = श्रेष्ठ लोगों का
प्रामाण्यम् = प्रमाण या सबूत के रूप में
इतिवृत्तम् = वृतान्त, जानकारी
राज्ञः = राजा का
कल्पः = सूत्र ग्रन्थ
चक्षुः = नेत्र
श्रोत्रम् = कान
घ्राणम् = नाक
पावयति = पवित्र बनाता है
आत्मोत्सर्गाय = आत्म बलिदान के लिए
अभिवादनम् = प्रणाम करना, सम्मान करना
उवाच = कहा

## अभ्यास

1. निम्नलिखित प्रश्नों का उत्तर हिन्दी में लिखो-
   (क) वेदों का पढ़ना क्यों अनिवार्य है ?
   (ख) भाषा का प्राचीनतम रूप किस ग्रन्थ में दिखाई पड़ता है ?
   (ग) वेद के विषय में महर्षि दयानन्द ने क्या कहा है ?

(घ) 'नमस्ते' का क्या अर्थ है ?

2. संस्कृते उत्तरं लिखत-

(क) वेदानां नामानि लिखत।

(ख) वेदस्य कः अर्थः ?

(ग) वेदेषु अभिवादनाय कः शब्दः व्यवहृतः

(घ) विभिन्न-समस्यानां समाधानं केषु शास्त्रेषु विद्यते ?

3. निम्नलिखित शब्दों में से उचित शब्द चुन कर रिक्त स्थानों की पूर्ति करें-

ऋग्वेदः, ज्ञानविज्ञान, उन्नायकाः, पादौ, षड् ।

(क) -----प्राचीनतमः ग्रन्थः।

(ख) वेदस्य---अंगानि सन्ति।

(ग) छन्दः वेदस्य-----।

(घ) वेदाः विविध----राशयः।

4. सन्धि/सन्धि विच्छेद करें-

समाधानार्थं, नमस्ते, कः + अर्थः, अथर्ववेदश्च, शुभ + अशुभम्, एक + ईश्वरः।

## पंचमः पाठः

# भर्तृहरि-वचनानि

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥1॥

लभेत् सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटञ्शशविषाणमासादयेत् ।
न तु प्रतिनिविष्ट-मूर्खजनचित्तमाराधयेत् ॥2॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजनाः न परित्यजन्ति ॥3॥

तानीन्द्रियाण्यविकलानि तदेव कर्म,
सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव
त्वन्यः क्षणेन भवतीति विचित्रमेतत् ॥4॥

साहित्य-संगीत-कला-विहीनः
साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानः
तद् भागधेयं परमं पशूनाम् ॥5॥

सिंहः शिशुरपि निपतति
मदमलिन-कपोलभित्तिषु गजेषु
प्रकृतिरियं सत्त्ववतां
न खलु वयस्तेजसो हेतुः ॥6॥

विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक् पटुता, युधि विक्रमः
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥7॥

संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनी पत्र स्थितं राजते।
स्वात्यां सागर-शुक्ति मध्ये पतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो जायन्ते ॥8॥

रे रे चातक, सावधानमनसा, मित्र, क्षणं श्रूयताम्
अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥9॥

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान्प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥10॥

## शब्दार्थ

नीतिनिपुणाः = लोकव्यवहार में कुशल
स्तुवन्तु = प्रशंसा करें।
यथेष्टम् = इच्छानुसार।
मद-मलिन-कपोलभित्तिषु = मद से मैली गालों पर
सिकतासु = रेत में।
पिपासार्दितः = प्यास से व्याकुल।
शशविषाणम् = खरगोश के सींग।
प्रतिनिविष्ट = हठी।
प्रारब्धम् = आरम्भ किए हुए को।
विरमन्ति = रुक जाते हैं।
अर्थोष्मणा = धन की गर्मी से।
अप्रतिहता = अकुण्ठित, तीव्र।
भागधेयम् = सौभाग्य।
सदसि = सभा में।
अभ्युदये = भाग्योदय होने पर।
अयसि = लोहे पर।
मुक्ताकारतया = मोती के आकार सा।
स्वात्याम् = स्वातिनक्षत्र में।
आर्द्रयन्ति = भिगोते हैं, गीला करते हैं।

अविकलानि - विकार रहित, स्वस्थ। गुह्यम् = रहस्य को।
निवारयति - दूर करता है, हटाता है जहाति = छोड़ता है।
निगूहति = छिपाती है।

## अभ्यास

1. निम्नलिखित प्रश्नों के उत्तर हिन्दी में लिखो?
   (क) अच्छे मित्र के क्या लक्षण हैं।
   (ख) पुच्छविषाणहीन पशु के साथ किसकी तुलना की गई है?
   (ग) उत्तम, मध्यम और अधम पुरुषों में क्या अन्तर होता है?
2. संस्कृते उत्तरं लिखत-
   (क) केन विहीनः नरः अन्यः भवति?
   (ख) अम्भोदाः कैः आर्द्रयन्ति वसुधाम्?
   (ग) जलबिन्दुः नलिनी-पत्र-स्थितं कथं राजते?
3. नीचे लिखे शब्दों से रिक्त स्थानों की पूर्ति करें-
   (धीराः, मध्याः, सलिलम् , सज्जनाः, सिंहः.)
   (क) प्रारभ्य विघ्नविहताः विरमन्ति ---- ।
   (ख) पिबेत् मृगतृष्णिकासु- पिपासार्दितः।
   (ग) न्याय्यात् पथः प्रविचलन्ति पदं न----।
   (घ) ---शिशुरपि निपतति।
4. यथानिर्दिष्ट परिवर्तन करें-
   (क) सिंहः निपतति । (द्विवचन में)
   (ख) ते दुग्धम् अपिबन्। (उत्तम पुरुष में)
   (ग) वयं विद्यालयं न अगच्छाम्। (लोट् लकार में)
5. सन्धि/सन्धिच्छेद करें-
   कदाचिद् + एव, पुनरपि, शिशुः + अपि, तन्मौक्तिकम्, वयः+ तेजसः, प्रकृतिरियम्।

## षष्ठः पाठः

# गौरसिंहस्य दौत्यम्

तमवलोक्य एव "इतः इतः गौरसिंह! उपविश, उपविश। चिराय दृष्टोऽसि, अपि कुशलं असि? अपि कुशलिनः तव सहवासिनः? अप्यंगीकृतं महाव्रतं निर्वहथ यूयम्? अपि कश्चित् नूतनो वृत्तान्तः?" कुसुमानि इव वर्षता, पीयूष-प्रवाहेण सिंचता, मृदुना वचनजातेन तत्रभवता शिववीरेण आद्रियमाणः, आपृच्छयमानः च, त्रिःप्रणम्य अन्तरंग मण्डली जुष्टकटे समुपविश्य, करौ सम्पुटीकृत्य "भगवन्। अखिलं कुशलं प्रभूणाम् अनुग्रहेण अस्माकम् अखिलानाम्, अंगीकृते महाव्रते च मा स्यात् कश्चिद् अन्तरायः, इत्येव सदा प्रार्थ्यते भगवान् भूतनाथः। नूतनः पुरातनश्च को नाम अद्यतन समये वक्तव्यः श्रोतव्यः च वृत्तान्तः ऋते दुराचारात् स्वच्छन्दानाम् उच्छृंखलानाम् उच्छिन्न-सच्छीलानां म्लेच्छ-हतकानाम्" इति अकथयत्। ततश्च तेषाम् एवमभवद् वार्तालापः-

शिववीर :- अथ कथ्यतां, को वृत्तान्तः? का च व्यवस्था अस्माकं, महाव्रताश्रम-परम्परायाः?

गौरसिंहः- भगवन्। सर्वं सुसिद्धम्, प्रतिगव्यूतिः अन्तरालं अंगीकृत-सनातन-धर्म-रक्षा-महाव्रतानां धारित मुनि वेषाणां वीरवराणाम् आश्रमाः सन्ति। प्रत्याश्रमं च वलीकेषु गोपयित्वा स्थापिताः परश्शताः खड्गाः, पटलेषु तिरोभाविताः शक्त्यः, कुशपुंजान्तः स्थापिताः भुशुण्ड्यश्च समुल्लसन्ति। उंछस्य, शिलस्य, समिदा हरणस्य, भुर्जपत्र परिमार्गणस्य, कुसुमावचयनस्य, तीर्थाटनस्य सत्संगस्य च व्याजेन केचन जटिलाः, परे मुण्डिनः, इतरे काषायिणः, अन्ये मौनिनः, अपरे ब्रह्मचारिणः च बहवः पटवो बटवश्चराः संचरन्ति। विजयपुराद् उड्डीय अत्र आगच्छन्तीं मक्षिकाम् अपि विद्मः, किं नाम एषा यवनहतकानाम्?

शिववीरः- साधु, साधु कथं न स्यादेवम्? भारतवर्षीयाः यूयम्, तत्रापि महोच्चकुल-जाताः, पवित्रतमश्च युष्माकं सनातनो धर्मः। तमेते जाल्माः समूलम् उच्छिन्दन्ति। 'प्राणाः यान्तु न च धर्मः' इत्यार्याणां दृढः सिद्धांतः। महान्तो हि धर्मस्य कृते सर्वाणि सुखानि त्यक्त्वा वर्षा-ग्रीष्म-शिशिरेष्वपि, महारण्येषु अपि, सिंह-संघेष्वपि निर्भयाः विचरन्ति। धन्याः यूयम् आर्यवंशीयाः, वस्तुतः भारतीयाः।

## शब्दार्थ

| | |
|---|---|
| अवलोक्य = देखकर | उपविश = बैठो |
| चिराय = देर बाद | महाव्रतं = महान निश्चय |
| सहवासिनः = साथी | वृत्तान्तः = घटना |
| निर्वहथ = पालन कर रहे हो | आद्रियमाणः = सम्मान दिया जाता हुआ |
| पीयूष = अमृत | जुष्ट-कटे = चटाई पर |
| त्रिः प्रणम्य = तीन बार प्रणाम करके | अनुग्रहेण = कृपा से |
| करौ संपुटीकृत्य = हाथ जोड़कर | मा = न |
| अंगीकृते = स्वीकार किए हुए (में) | भूतनाथः = भगवान् शिव |
| अन्तरायः = विघ्न | ऋते दुराचारात् = अत्याचार के बिना |
| पुरातनः = प्राचीन | उच्छृंखलानाम् = उद्दण्डों का |
| स्वच्छन्दानाम् = मनमर्जी करने वालों (का) | म्लेच्छ-हतकानाम् = नीच हत्यारों (के) |
| उच्छिन्न-सच्छीलानाम् = नष्ट हुए अच्छे चरित्र वाले | प्रतिगव्यूतिः = प्रत्येक दो कोस पर |
| सुसिद्धम् = सफल हुआ | परश्शताः = सैकड़ों |
| वलीकेषु = बल्लियों में | कुशपुंजान्तः = कुशा के ढेरों में |
| पटलेषु = (छप्परों) छतों में | उंछस्य = खेतों में गिरे अन्न को चुनना |
| भुशुण्डयः = बंदूकें | समिदाहरणस्य = यज्ञ की लकड़ी लाने (के) |
| शिलस्य = बल्लियाँ चुगने | व्याजेन = बहाने से |
| भूर्जपत्र परिमार्गणस्य = भोज-पत्र ढूँढने | मुण्डिनः = मुंडे सिर वाले |
| जटिलाः = जटाधारी (बहुवचन) | पटवो = चतुर |
| काषायिनः = भगवा वस्त्र वाले | मक्षिकाम् = मक्खी को |
| बटवश्चराः = ब्रह्मचारी गुप्तचर | महारण्येषु = बड़े-बड़े वनों में |
| त्यक्त्वा = त्यागकर | वस्तुतः = वास्तव में |

## अभ्यास

1. हिन्दी में उत्तर लिखो-
   (क) गौर सिंह किस शासक का गुप्तचर था ?
   (ख) शिवाजी के समय मुगलों द्वारा क्या अत्याचार किए जा रहे थे।
   (ग) आश्रमों में हथियार कहां छिपाकर रखे जाते थे।
   (घ) शिवाजी के गुप्तचर किन रूपों में विचरते थे ?
2. संस्कृते उत्तरं लिखत-
   (क) शिववीरस्य दूतस्य किं नाम अस्ति ?
   (ख) आर्याणां दृढ-सिद्धांत: क: आसीत् ?
   (ग) गौरसिंह: शिवस्य समीपम् कथम् आगत: ?
3. नीचे लिखे शब्दों में से शब्द चुनकर रिक्त स्थान भरो-
   (अथ, भूतनाथ:, धर्म, वस्तुत: असि)
   (क) इत्येवं सदा प्रार्थ्यते भगवान्-----।
   (ख) धन्या: यूयं आर्यवंशीया: - - -भारतीया:।
   (ग) -----कथ्यतां, को वृत्तान्त: ?
   (घ) अपि कुशलं---- ?
4. यथानिर्दिष्ट परिवर्तन करो-
   (क) ततश्च तेषाम् एवम् अभवत् वार्तालाप:। (द्विवचन में)
   (ख) प्राणा: यान्तु न च धर्म: (लृट् लकार में)
   (ग) धन्या: यूयम् आर्यवंशीया:। (प्रथम पुरुष)
   (घ) तम् एते जाल्मा: समूलम् उच्छिन्दन्ति। (स्त्रीलिंग में)
5. सन्धि/सन्धिच्छेद करो-

इत्यार्याणाम्। संघेषु + अपि। धन्या: + यूयम्। ब्रटवश्चरा: । सम् + चरन्ति। दृष्टोऽसि

❀❀❀

## सप्तमः पाठः

# विज्ञानाचार्यः श्रीरमणः

आचार्यः चन्द्रशेखररमणमहोदयः 1888 तमे ईसाब्दे नवम्बरमासस्य सप्त-दशतारिकायां दक्षिणभारतस्य तिरुचिरापल्लीनगरम् स्वजन्मना अलंकृतवान्। अस्य महाभागस्य जनकः चन्द्रशेखरः अय्यरः पूर्वम् उच्चविद्यालये अध्यापयति स्म। अनन्तरं भौतिक-विज्ञानविषये स्नातकोत्तरोपाधिं प्राप्य सः महाविद्यालये प्राध्यापकः संवृत्तः। रमणस्य मातुः पार्वत्याः परिवारः पाण्डित्येन धार्मिकप्रवृत्त्या च प्रख्यातः आसीत्। अतः पारिवारिक-परिवेशेन तस्य विज्ञाने धर्मे चापि समरुचिः अभवत् ।

द्वादशवर्षदेशीय एव रमणः मैट्रिक-परीक्षां ससम्मानम् उत्तीर्णवान्। षोडशे वर्षे प्राप्ते तु स प्रथमश्रेण्यां स्नातकोपाधिम् उपलब्धवान्। भौतिकविज्ञाने एम० ए० परीक्षायामपि स न केवलं प्रथमं स्थानम् अलभत्, अपितु तत्र तावत् अंकान् लब्धवान्, यावत् ततः पूर्वं न कोऽपि प्राप्तुम् अशक्नोत् ।

अस्य योग्यतया शोधरुच्या च प्रभाविताः अधिकारिणः ''युवा रमणः विज्ञान-विषये उच्चशिक्षाम् अधिगन्तुम् आंगलदेशं गच्छेत्'' इति विचारम् अकुर्वन्। परम् अस्य शरीरं समुद्र-यात्राकष्टानि सोढुं तत्र च चिरं निवासं कर्तुं न समर्थमिति भिषग्भिः उद्घोषितम्, अतः तेन योजनेयं त्यक्ता। अनेन अप्रत्याशितेनाघातेन अपि रमणमहोदयः हतोत्साहः नाभवत्। स केन्द्रीयस्यार्थविभागस्य सर्वोच्च-प्रतियोगितापरीक्षायां सर्वप्रथमं स्थानं प्राप्नोत्। एवं स निजया अप्रतिमया योग्यतया उपमहालेखाकारपदम् अध्यगच्छत्। तस्मिन् समये अयं महानुभावः सर्वविधानाम् अर्थसमस्यानां योग्यतमः समाधानकर्ता गण्यते स्म। अर्थविभागकार्यालये दैनिक-कार्याणि कृत्वा स शेषकालं विश्वविद्यालयस्य प्रयोगशालासु विज्ञान-समस्याः समाधानं कुर्वन् नयति स्म। यदा रमणमहाभागः कालिकाता-कार्यालये नियुक्तः आसीत्, तदा स 'भारतीय विज्ञानपरिषद्' नाम-संस्थायाः परिचयमधिगतवान् तस्याः सदस्यतां च लब्धवान्। अनेनास्य शोधकार्ये अतीव सौविध्यम् अभवत्।

यदा कालिकातानगरे ''विज्ञान-महाविद्यालयस्य'' स्थापना जाता, तदा स तस्य प्रधानाचार्यपदम् अलमकरोत् । एवं स विज्ञान साधनायै अर्थकरीं राजसेवाम् अपि अत्यजत्।

वैज्ञानिकशोधक्षेत्रे सः अद्वितीयां सफलतामाप्तवान् । अस्य वैज्ञानिकगवेषणा बहुविषयात्मिका लोकोपयोगिनी च आसीत्। अनेन रमणकिरणाख्याः नूतनाः प्रकाश-

किरणाः गवेषिताः । तेषां किरणानां प्रभावः रमण-प्रभाव नाम्ना ज्ञायते। अनया गवेषणया नानाक्षेत्रेषु वैज्ञानिकशोधकार्यं सरलम् अजायत । रमणस्य शोधक्षेत्रम् अति-विस्तृतम् आसीत् । विशेषतः शब्द-प्रकाश-वर्ण-सागरतोय-किरण-चुम्बकादिक्षेत्रेषु तेन बहुमूल्यं मौलिकं च शोधकार्यं संपादितम् । रमणकिरणानां गवेषणया तु सर्वं जगत् भृशं प्रभावितम्। गवेषणाम् इमाम् उद्दिश्य लन्दनस्थ-राजकीय-परिषदा 'ह्यूजपदकं'-प्रदानेन सम्मानितोऽयं विज्ञानाचार्यः। अथापि स विश्वस्य उच्चतमेन नोबेल-पुरस्कारेण अपि संभूषितः अभवत्। अतः प्राक् पाश्चात्याः विज्ञानविदः सगर्वम् उद्घोषयन्ति स्म ''सर्वेऽपि विज्ञानविदः यूरोपीया एव, यदि ते न यूरोपीयाः तदा ते यूरोपे लब्धशिक्षाः'' इति। अयं पुण्यश्लोकः तेषामिमां मान्यताम् अन्यथा अकरोत्, यतो हि एष न यूरोपे जातः नापि च तत्र शिक्षाम् अधिगतवान्।

कालिकाता-विश्वविद्यालयतः सेवानिवृत्तः अयं रमणवैज्ञानिकसंस्थानम् अस्थापयत्। तत्रैव स्वकीयमवशिष्टं जीवनं वैज्ञानिक-शोध-मार्गदर्शनाय समर्पितवान् । एवम् अस्य विज्ञान-साधनया भारतं वैज्ञानिक-जगति दिवाकरवत् अदीव्यत् ।

सरलप्रकृतिः विशाल हृदयः श्रीरमणः राजनीतौ, समाजशास्त्रे, अर्थशास्त्रे, इतिहासे चापि पारङ्गतः आसीत् । वाग्देव्याः एष वरदपुत्रः अनेकभाषाविद् अपि आसीत्।

1970 तमे ईसाब्दे दिसम्बरमासे बैंगलोरनगरे अस्य भारतरत्नस्य निधनम् अभवत्।

## शब्दार्थ

विज्ञानाचार्यः = महान् वैज्ञानिक
ईसाब्दस्य = ईस्वी सन् के
द्वादशवर्षदेशीयः = बारह वर्ष की अवस्था में
स्नातकोपाधि = बी॰ ए॰ की डिग्री
अधिगन्तुम् = (अधि √गम् , तुमुन्) प्राप्त करने के लिए
अप्रतिमया = अद्वितीय (योग्यता) द्वारा
आंगलदेशः = इंग्लैंड देश
भिषग्भिः = डॉक्टरों द्वारा
स्नातकोत्तरोपाधिम् = एम.ए. की डिग्री को
समरुचिः = समान रुचि वाला
गवेषणा = खोज
प्राक् = पहले
पुण्यश्लोकः = पवित्र कीर्ति वाला
सागरतोय = समुद्र का पानी
सेवानिवृत्तः = नौकरी से रिटायर हुआ
लब्धशिक्षाः = जिन्होंने शिक्षा प्राप्त की है
प्राधानाचार्यः = प्रिंसिपल

| | |
|---|---|
| उपमहालेखाकार = डिप्टी एकाउटैंट जनरल | पारंगत = उच्चकोटि का विद्वान, माहिर |
| सौविध्यम् = सुविधा | दिवाकरवत् = सूर्य के समान |

## अभ्यास

1. निम्नलिखित प्रश्नों के उत्तर हिन्दी में लिखें-
   (क) श्रीरमण के पिता क्या कार्य करते थे ?
   (ख) श्रीरमण उच्चशिक्षा के लिए इंग्लैंड क्यों नहीं जा सके ?
   (ग) श्रीरमण को नोबेल पुरस्कार किस कार्य पर मिला ?
   (घ) इन्होंने सरकारी सेवा छोड़कर प्रिंसिपल का पद क्यों स्वीकार किया ?
2. संस्कृते उत्तरत-
   (क) श्रीरमण:, स्वजन्मना किं नगरम् अभूषयत् ?
   (ख) श्रीरमण: 'ह्राजपदकं' कतमेन शोधेन अलभत् ?
   (ग) सेवानिवृत्त: रमण: किम् अस्थापयत् ?
3. नीचे दिए गए शब्दों में से उचित शब्द चुनकर रिक्त स्थानों की पूर्ति करें :-
   (सौविध्यम्, अद्वितीयम्, संवृत्त:, नियुक्त:, त्यक्ता)
   (क) स: महाविद्यालये प्राध्यापक :------- ।
   (ख) तेन योजनेयं ------- ।
   (ग) अनेनास्य शोधकार्ये अतीव------अभवत्।
   (घ) वैज्ञानिक शोधक्षेत्रे स: -----सफलतामाप्तवान्।
4. यथानिर्दिष्ट परिवर्तन करें-
   (क) स: उच्चशिक्षाम् अधिगन्तुम् आंग्लदेशं गच्छेत्। (लृट् लकार में)
   (ख) स: अर्थ विभागस्य सर्वोच्च प्रतियोगिता-परीक्षायां सर्वप्रथमं स्थानं प्राप्नोत्। (स्त्रीलिंग में)
   (ग) त्वम् इतिहासे पारंगत: असी:। (बहुवचन में)
   (घ) स: महाविद्यालये प्राध्यापक: संवृत्त:। (उत्तम पुरुष में)
5. सन्धि/सन्धिच्छेद करें-
   योजना + इयम् , अध्यगच्छत्, वाक् + देव्या:, नाभवत्, हत +उत्साह:, स्नातकोपाधिम्।

अष्टमः पाठः

# भोजराजः पुनर्जीवितः

पुरा धारा-राज्ये सिन्धुलो नाम राजाऽभवत्। वृद्धावस्थायां तस्य 'भोज' इति पुत्रस्य जन्म अभवत्। स यदा पंचवर्षीयः आसीत्, तस्य पिता सिन्धुलः सर्वं उच्चावचं विचार्य राज्यं निज-भ्रात्रे मुंजाय दत्वा तदुत्संगे भोजम् अमुंचत्।

ततः कालान्तरेण नृपे नाकलोकं प्रस्थिते राजा मुंजः सिंधुलस्य हितकरं मुख्यामात्यं दूरं कृत्वा तत्पदे अन्यमस्थापयत्। एकदा ज्योतिष-शास्त्र-पारंगतः कश्चित् विद्वान् ब्राह्मणः राजसभायां समागतः। मुंज तं भोजस्य जन्मपत्रिकाम् अदर्शयत्। सः दैवज्ञः अवदत्- 'राजन्। भोजस्य भाग्योदयं वक्तुं विधाताऽपि नाऽलम्। तस्य भाग्यं कथयामि स्वमत्यनुसारम्।

पंचाशत् पंचवर्षाणि, सप्तमास-दिन-त्रयम्।
भोजराजेन भोक्तव्यः, सगौडो दक्षिणापथः॥

तत् आकर्ण्य राजा 'राज्यलक्ष्मीः भोजकुमारं गमिष्यति' इति चिन्तया विच्छाय-वदनोऽभवत्। सः बंग-देशाधीश्वरम् आहूय तं भुवनेश्वरी विपिने भोजस्य वधम् कर्तुम् आदिष्टवान्। ततः अस्तंगते सूर्ये महामायाभवनम् आसाद्य वत्सराजः भोजम् अकथत्- 'कुमार ! लोभाविष्टचेता राजा तव वधम् आदिष्टवान्।' कुमारः भोजः दुर्मना अभवत्। सः निजां जंघां छुरिकया छित्वा एकस्मिन् पत्रे निज-रक्तेन एकं श्लोकं लिखित्वा वत्सराजम् अकथयत्- 'महाराज! पत्रम् एतत् राज्ञे दातव्यम्' इति।

ततो वैराग्यापन्नः वत्सराजः भोजं रथे निवेश्य गहनांधकारे स्वगृहं नीतवान्। भूमिगृहाभ्यन्तरे सः तं अरक्षत्। ततः चतुरैः शिल्पिभिः सकुण्डलं निमीलित-नेत्रं भोजकुमारस्य मस्तकं कारयित्वा राजभवनम् अनयत्। सः राजानं प्रणम्य अवदत्- 'श्रीमता यत् आदिष्टम् तत्साधितम्' इति। राजा अपृच्छत्- 'वत्सराज। खड्ग-प्रहारसमये पुत्रेण किम् उक्तम्?' इति। सः भोजस्य पत्रम् अयच्छत्। राजा श्लोकम् अवाचयत्।

मांधाता च महीपतिः कृतयुगालंकार- भूतो गतः।
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः॥
अन्ये चापि युधिष्ठिर प्रभृत्यो याता दिवं भूपते।
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति॥

राजा तदर्थम् विज्ञाय शय्यातो भूमौ अपतत्। पुत्र-वधस्य प्रायश्चितार्थम् राजा वह्नि-प्रवेशं निश्चितवान्। राज्ञः मरणवार्तां श्रुत्वा वत्सराजः गृहमागत्य बुद्धिसागरम् नत्वा तस्य कर्णे किमपि कथयित्वा निष्क्रान्तः। ततः शीघ्रमेव कश्चित् कापालिकः सभायाम् उपस्थितः। तम् दृष्ट्वा बुद्धिसागरः अकथयत् 'योगिराज! कुतः आगम्यते? कुत्र ते निवेशः च? कापालिकः त्वयि यश्चमत्कारः, कला- विशेषः औषधि-विशेषः वा, तत्कथय। योगी अभणत्- नैकदेशः अस्माकम्। सफलं भूमण्डलं भ्रमामः। सर्पदष्टं, विषव्याकुलं शस्त्रहतं च तत्क्षणात् एव पुनः जीवितं कुर्मः।' राजा तं भोजस्य प्राणदानाय प्रार्थनाम् अकरोत्। कापालिकः बुद्धिसागरेण सह हवन-द्रव्याणि गृहीत्वा श्मशान-भूमिम् अगच्छत्।

'योगिना भोजः जीवितः कृतः, इति चर्चा सर्वत्र प्रासरत्। ततः गजारूढः बन्दिभिः स्तूयमानः भोजराजः राजभवनम् प्राविशत्। भोजं राजसिंहासने निवेश्य मुंजः निज-पट्ट-महिषीभिः सह तपोवनम् अगच्छत्।'

## शब्दार्थ

उच्चावचं विचार्य = लाभ-हानि का विचार करके
अमुंचत् = छोड़ दिया
मुख्यामात्यम् = मुख्य-मन्त्री
आकर्ण्य = सुनकर
आहूय = बुलाकर
दुर्मना = दुःखी मन वाला
निवेश्य = डालकर
कारयित्वा = बनवाकर
तत्साधितम् = वही कर दिया
सेतुः = पुल
दैवज्ञ = ज्योतिषि
प्रभृतयः = आदि
समं गता = साथ गई
कापालिकः = योगी
उत्संगे = गोद में
हितकरम् = लाभकारी
नाऽलम् = समर्थ नहीं
विच्छायवदनः = उड़े रंग वाले मुख वाला
आसाद्य = पहुँचकर (प्राप्त करके)
छित्त्वा = काटकर
शिल्पिभि : = कलाकारों से
अनयत् = ले गया
कृतयुग = सत्ययुग
दशास्यान्तकः = भगवान राम (दश मुख को मारने वाले)
यातां दिवम् = स्वर्ग चले गए
निष्क्रान्तः = निकल गया
अभणत् = बोला

तत्क्षणात् = उसी पल

प्रासरत् = फैल गया

वन्दिभि: = स्तुति गायकों द्वारा

पट्ट-महिषीभि: = पटरानियों के साथ

हवन-द्रव्याणि = हवन-सामग्री

गजारूढ: = हाथी पर चढ़कर

निवेश्य = बिठा कर

नाकलोकं = स्वर्ग लोक को

## अभ्यास

1. हिन्दी में उत्तर लिखो-

(क) राजा भोज के पिता सिन्धुल ने शासन किसे और क्यों सौंप दिया?

(ख) मुंज ने राजकुमार भोज को मारने की योजना क्यों बनाई?

(ग) वत्सराज ने भोज की रक्षा कैसे की?

(घ) कापालिक किस-किस विद्या में निपुण था?

2. संस्कृते उत्तरं लिखत-

(क) राजा सिंधुलस्य मुख्यामात्यस्य किं नाम आसीत्?

(ख) राजा शय्यातो भूमौ कथम् अपतत्?

(ग) किं कुमार: भोज: सत्यमेव मृत: आसीत्?

3. नीचे लिखे शब्दों में से शब्द चुनकर रिक्त स्थान भरो-

अदर्शयत्, तं, सकलं, जीवित:, पत्रम्

(क) महाराज! एतत् -------- राज्ञे दातव्यम्।

(ख) भूमिगृहाभ्यन्तरे स: -------- अरक्षत्।

(ग) "योगिना भोज:------कृत:" इति सर्वत्र चर्चा प्रासरत्।

(घ) मुंज: तं भोजस्य: जन्मपत्रिकाम् --------।

4. यथानिर्दिष्ट परिवर्तन करो-

(क) स: यदा पंचवर्षीय: आसीत्। (लृट् लकार में)

(ख) स: राजानं प्रणम्य अवदत्। (बहुवचन में)

(ग) वयं सकलं भूमण्डलं भ्रमाम:। (मध्यम पुरुष में)

(घ) स: भोजं पत्रम् अयच्छत्। (स्त्रीलिंग में)

5. सन्धि करो-

पुत्र: + अजायत्। अन्यम् + अस्थापयत्। वि + छायवदन: युधि + स्थिर:।

## नवमः पाठः

# चाणक्य-वचांसि

वरं तेजस्विनो मृत्युर्न तु मानस्य खण्डनम् ।

मृत्युरेकदिनं हन्ति, ह्यपमानः पदे-पदे ॥1॥

वरं दरिद्रः श्रुतिशास्त्र-पाठकः,

न चार्थयुक्तः श्रुतिशीलवर्जितः ।

सुलोचनः क्षीण-पटोऽपि शोभते,

न नेत्रहीनः कनकाद्यलङ्कृतः ॥2॥

उत्तमः प्रणिपातेन, शूरः भेदेन युज्यते ॥

नीचः स्वल्प-प्रदानेन, समस्तुल्य पराक्रमैः ॥3॥

मातेव रक्षति, पितेव हिते नियुंक्ते,

कान्तेव चाभिरमयत्यपनीय दुःखम् ।

कीर्तिं च दिक्षु वितनोति, ददाति लक्ष्मीं

किं किं न साधयति कल्पलतेव विद्या ॥4॥

शनैरर्थः, शनैःपन्थाः, शनैः पर्वतरोहणम् ।

शनैर्विद्या च धर्मश्च, व्यायामश्च शनैः शनैः ॥5॥

उदीरितार्थः पशुनापि बुध्यते, हयाश्च नागाश्च वहन्ति नोदिताः ।

अनुक्तमप्यूहति पण्डितो जनः, परेङ्गितज्ञानफला हि बुद्धयः ॥6॥

यो ध्रुवाणि परित्यज्य ह्यध्रुवाणि निषेवते ।

ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ॥7॥

कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।

मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥8॥

सुखार्थी चेत् त्यजेत् विद्यां, विद्यार्थी चेत् त्यजेत् सुखम् ।

न विद्यासुखयोः सन्धिस्तेजस्तिमिरयोरिव ॥9॥

दुर्जनस्य मुखे प्रीतिः वाचि चन्दनशीतता ।

हृदये तस्य दुर्बुद्धिः कुलिशादपि कर्कशा ॥10॥

कनकभूषण-संग्रहणोचितो,
यदि मणिस्त्रिपुणि प्रतिबध्यते ।
न स विरौति, न चापि विशोभते,
भवति योजयितुर्वचनीयता ॥11॥
क्रुद्धो गुरुर्वदति यानि पदानि शिष्ये,
दावाग्नि-दाह-सदृशानि भवन्ति तानि ।
तान्येव तत्परिचयेन सुशिक्षितानि,
पश्चाद् भवन्ति कमलाकर-शीतलानि ॥12॥

## शब्दार्थ

मानस्य खण्डनम् = अपमान होना
अलंकृत = सुशोभित
वितनोति = फैलाती है
क्षीणपटः = फटे वस्त्रों वाला
प्रणिपातेन = नम्रता से (झुक कर)
नियुंक्ते = (नि + √युज्, लट्, प्र० पु०, ए० व०) लगाती है
उदीरितार्थ = (उदीरित + अर्थ) कहा हुआ (भाव)
स्तबक = गुच्छा
कर्कशा = कठोर
कुलिशादपि = (कुलिशात् + अपि) वज्र से भी
पन्था = मार्ग
नोदिता : = प्रेरित किए गए
अनुक्तम् = बिना कही बात को
परित्यज्य = छोड़कर
वचनीयता = निन्दा
विरौति = (वि √रु, लट्, प्र०, पु०, ए० व०) रोती है
योजयितुः = लगाने वाले की

## अभ्यास

1. (क) अपमान मृत्यु से बुरा क्यों है ?
   (ख) विद्वान् कैसी बात भी समझ लेते हैं ?
   (ग) मनस्वी व्यक्ति की वृत्ति कैसी होती है ?
   (घ) गुरु के कठोर वचन कब और कैसे शीतल लगते हैं ?

2. नीचे दिए गए शब्दों से रिक्त स्थानों की पूर्ति करो —

(क्षीणपटः, नेत्रहीनः, पंडितो, पितेव)

(क) ……… हिते नियुंक्ते।

(ख) सुलोचनः ……… अपि शोभते ।

(ग) अनुक्तमप्यूहति ……… जनः ।

3. **संस्कृते उत्तरं लिखत—**

(क) कनकाद्यलंकृतः कः न शोभते ?

(ख) विद्या पितेव किं करोति ?

(ग) दावाग्नि-दाह सदृशानि अपि गुरोर्वचनानि कदा कमलाकर-शीतलानि भवन्ति ?

4. **सन्धि/सन्धिच्छेद करो**

ह्यपमानः । समः + तुल्य । पितेव । माता +इव । शनैरर्थ : । दुः + बुद्धि ।

### दशम: पाठ:

# सोमप्रभा -परिणय:

एकदा वेताल: त्रिविक्रमसेनं महीपतिम् इमां कथामश्रावयत्- उज्जयिन्यां पुण्यसेननामा भूपति: आसीत्। तस्यामात्यो हरिस्वामी आसीत्। हरिस्वामिन: द्वे सन्तती आस्ताम्-एक: पुत्रोऽपरा पुत्री च। पुत्रस्य नाम देवस्वामी पुत्र्याश्च नाम सोमप्रभा आसीत्।

रूपयौवन-सम्पन्ना सोमप्रभा पूर्णचन्द्रेणेव स्व-मुखेन सर्वेषां मनांसि अहरत। तां विवाह-योग्यां मत्वा तस्या: पिता, माता, भ्राता च सर्वे एव तस्या: वरप्राप्त्यै चिन्ताकुला: अभवन्। तस्मिन्नेवावसरे सोमप्रभा मातरमकथयत्- "मात:, मम विवाहस्तु केनापि शूरेण, ज्ञानिना, विज्ञानिना वा सह कर्त्तव्य:, अन्यथाऽहं प्राणान् त्यक्ष्यामि।" माताऽपि च तस्या: निखिलमभीष्टं तस्या: पित्रे भ्रात्रे च न्यवेदयत्।

एकदा हरिस्वामी कार्यवशात् दक्षिण-प्रदेशमगच्छत्। तत्रैको ब्राह्मणयुवक: हरिस्वामिनमकथयत् यत् स: (हरिस्वामी) स्वकन्याया: सोमप्रभाया: पाणिग्रहणं तेन (ब्राह्मणयुवकेन) सह कुर्यात्। तदा हरिस्वामी तमवदत्- "भद्र, मम कन्याया: पणो वर्तते यत्सा कमपि शूरं, ज्ञानिनं, विज्ञानिनं वा स्व-पतिं वरिष्यति। अत: भवान् वदतु यत् भवानेतेषु कोऽस्ति ?" स: ब्राह्मणयुवकोऽवदत्- "अमात्य अहं वैज्ञानिक: अस्मि।"

तदा हरिस्वामी तमवदत्- "दर्शय किमपि कौशलम्।"

निजविज्ञानस्य कौशलं प्रदर्शयितुं विज्ञानी विमानमेकमकल्पयत्, तस्मिन् च हरिस्वामिनमुपवेश्य दूरस्थान प्रदेशानदर्शयत्। तस्यैतादृशं कौशलं दृष्ट्वा तमेव योग्यं वरं मन्यमान: हरिस्वामी स्वसुताया: पाणिग्रहणं तेनैव सह प्रत्यजानात्। निश्चिते दिवसे च वरयात्रा आगमनार्थमकथयत्।

इत: उज्जयिन्यां कन्याया: भ्राता देवस्वामी कमपि अन्यं युवकं शूरं मत्वा तस्य कौशलं दृष्ट्वा प्रत्यजानात् यत् सोम-प्रभाया: विवाहस्तेनैव सह भविष्यति। वरयात्राया: दिनञ्च तदेव निश्चितं यत् हरिस्वामी विज्ञानिना सह निश्चितवान्। पतिपुत्रयो: अनुपस्थितौ गृहे एकोऽन्य: युवक: आगच्छत्। स: च सोमप्रभाया: मात्रे न्यवेदयत् यत्- "स: ज्ञानी अस्ति, अत: तस्या: कन्यायै योग्यो वरोऽस्ति। अत: सोमप्रभा तस्मै दातव्येति।" माताऽपि तस्य योग्यतां ज्ञात्वा प्रत्यजानात् यत् सोमप्रभाया: विवाह: तेन युवकेन सहैव भविष्यति। दिनं च तदेव निश्चितं यत् हरिस्वामि-देवस्वामिभ्यां निश्चितमासीत्।

एवं त्रयो वराः एकस्यै कन्यायै निश्चिताः अभवन्।

अथ अग्रिमे दिवसे हरिस्वामी दक्षिण प्रदेशात् स्वगृहमागच्छत्। सः पत्न्यै पुत्राय चाकथयत् यत् सः सोमप्रभायै एकस्य विज्ञानिनो वरस्य निर्णयमकरोत्।

पत्युः वचः, श्रुत्वा सोमप्रभा-माताऽवदत्- "वरस्तु मयाऽपि निश्चितः।" तदा तस्याः भ्राता अपि एवमेव अवदत्।- पत्न्याः पुत्रस्य च वचांसि श्रुत्वा वरत्रयनिमन्त्रणात् हरिस्वामी चिन्ताकुलोऽभवत्।

अथ निश्चित दिवसे त्रय एव वराः यथाकालं हरिस्वामिनो गृहे उपातिष्ठन्। एतस्मिन्नेवावसरे सोमप्रभा वधूः क्वापि विलुप्ताऽभवत्। कुत्र गता सोमप्रभा? अत्रैवासीत्।" इत्येवं कथयन्तः सर्वे परिजनाः तामन्वेष्टुं तत्पराः अभवन्, परं तेषां सर्वः यत्नः निष्फलः एवाभवत।

तदा हरिस्वामी ज्ञानिनमकथयत् यत् सः ज्ञानबलेन जानीयात् यत्सोमप्रभा कुत्रास्ति इति। ज्ञानी स्वज्ञान-शक्त्या सर्वं प्रत्यक्षं कृत्वाऽवदत् यत् सोमप्रभां तु धूमशिखः नाम कश्चित् राक्षसः अपहृत्य विन्ध्याटवीं स्वां वसतिमगच्छत्। तदा हरिस्वामी विज्ञानिनेऽवदत् यत् सः विमानं करोतु, यद् आरुह्य सर्वे विन्ध्याटवीं गच्छेयुः। विज्ञानिना निर्मिते विमाने ज्ञानी विज्ञानी शूरश्च हरिस्वामिना सह तद् आरुह्य विध्याटवीं गताः। तत्र तान् दृष्ट्वा क्रुद्धः धूमशिखः तैः सह योद्धुमागच्छत। तस्मिन्नेव काले शूरः स्वान् प्राणान् आगणयन् राक्षसेन सह युद्ध्वा तं यमलोकस्य पथिकमकरोत्। सोम-प्रभां च प्राप्य ते सर्वे पुनः विमानेन हरिस्वामिनो गृहमागच्छन्।

अधुना 'कन्यां कः परिणयेत्?' इत्यासीत् प्रश्नः। ज्ञान्यकथयत् -"यद्यहं ज्ञानबलेन न अजानाम् यत् कन्या क्वास्ति तर्हि तां प्राप्तुं कोऽपि समर्थो नासीत्।" विज्ञान्यवदत्- "यद्यहं विमानं न अकरवम् तर्हि कथं सर्वे विध्याटवीं गन्तुं समर्थाः स्युः?" तदैव शूरोऽवदत्- "यद्यहं प्राणपणेन युद्ध्वा राक्षसं नामारयम् तर्हि सोमप्रभा कथं प्राप्ता स्यात्? ज्ञानिनो विज्ञानिनश्च सर्वं यत्नं निष्फलं भवेत्। तस्मादेषा मह्यं प्रदातव्या।"

हरिस्वामी त्रयाणां युक्तीः श्रुत्वा पुनः किंचिदपि निश्चेतुं नाशक्नोत्। एतावतीं कथां श्रावयित्वा वेतालः त्रिविक्रमसेनमपृच्छत्- "राजन्, एतस्मिन् विवादे तव कीदृशो निर्णयः? यदि सत्यं न वदिष्यसि तदा तव शिरः द्विधा स्फोटायिष्यामि।"

तदा त्रिविक्रमसेनः विचिन्त्य अवदत् यत् सा शूरायैव दातव्येति, यतः सः एव

प्राणपणेन तां मुक्तां कर्तुं समर्थोऽभवत्। ज्ञानिविज्ञानिनौ तु अस्य सहायकौ आस्ताम्। यथा राज्ञां गणकाः तक्षकाः च कर्मकराः भवन्ति तथैवास्यापि इमौ कर्मकरौ आस्ताम्।

त्रिविक्रमस्योत्तरं श्रुत्वा वेतालोऽतीव प्रसन्नोऽभवत्।

## शब्दार्थ

वेतालः = प्रेत विशेष।
वरिष्यति = चुनेगी।
अभीष्टम् = इच्छित, मन चाहा
विलुप्ता = गुम।
यमलोकपथः = मौत के घर का रास्ता।
कर्मकरः = नौकर।
तत्पराः = संलग्न।
गणकाः = ज्योतिषी।
पाणिग्रहणम् = विवाह।
अकल्पयत् = बनाया
पणः = प्रतिज्ञा।
जानीयात् = जाने।
द्विधा = दो टुकड़ों में।
तक्षकाः = बढ़ई।
प्राणपणेन = जान की बाजी लगाकर।

## अभ्यास

1. हिन्दी में प्रश्नों के उत्तर लिखो।
   (क) हरिस्वामी ने सोमप्रभा के विवाह के लिए कौन सा युवक चुना?
   (ख) कन्या की माता ने कैसे युवक की बारात लाने को कहा?
   (ग) देवस्वामी ने सोमप्रभा के लिए कैसे युवक को देखा?
   (घ) हरिस्वामी चिन्ता से व्याकुल क्यों हुआ?
2. संस्कृते उत्तरत-
   (क) हरिस्वामी कार्यवशात् कुत्र अगच्छत्?
   (ख) ज्ञानी ज्ञानबलेन किम् अकथयत्?
   (ग) उज्जयिन्याः भूपतेः किं नाम आसीत्?

3. नीचे लिखे शब्दों की सहायता से रिक्त स्थानों की पूर्ति करें-

(परिणयेत्, सन्तती, विवादे, चिन्ताकुल:)

(क) पिता तस्यै------अभवत्।

(ख) हरिस्वामिन: द्वे---आस्ताम्।

(ग) अधुना कन्यां क:-------।

(घ) एतस्मिन्----तव कीदृश: निर्णय: ?

4. यथानिर्दिष्ट परिवर्तन करें-

(क) पुण्यसेन: उज्जयिन्या: नृप: आसीत्। (लट् लकार)

(ख) अहं वैज्ञानिक: अस्मि। (मध्यम पुरुष)

(ग) सर्व: यत्न: निष्फल: अभवत्। (बहुवचन)

(घ) स: सत्यं न वदति। (स्त्रीलिंग)

5. सन्धि/सन्धिच्छेद करो।

तस्मिन् + एव, प्रति + अजानात्, नि +अवेदयत् । वरस्तु , विज्ञानन्यवदत्, इत्यासीत्।

## एकादशः पाठः

# राष्ट्रिय-कैडेट-कोरः

राष्ट्रियस्तरे युवा-संगठनं निर्मातुं पण्डित-जवाहरलाल नेहरूणा 1946 तमे ईसाब्दे समित्येका संगठिता। यस्या अध्यक्षः पण्डितहृदयनाथ-कुञ्जरूः आसीत्। 16 जुलाई 1948 तमे ईसाब्दे रक्षामन्त्रालयस्याधीनं कुञ्जरूमहोदयेन 'राष्ट्रिय कैडेट कोर (एन.सी.सी.) इति युवा संगठनं संस्थापितम्। अस्य संगठनस्य ध्येयम् 'एकता अनुशासनञ्च' अस्ति। युवकेषु सदाचार उत्साह-अनुशासन- निःस्वार्थ सेवा-धर्मनिरपेक्षतादि गुणानां सञ्चारोऽस्य संगठनस्य मुख्योद्देश्यमस्ति। युवकान् प्रशिक्षितशक्ति रूपेण संगठितान् कृत्वा द्वितीय सुरक्षा पंक्तिरूपे स्वकर्तव्यपालनस्य योग्यान् निर्मातुमप्यस्य संगठनस्यैकम् परमुद्देश्यम् अस्ति।

राष्ट्रिय-कैडेट कोरस्य नियन्त्रणं समन्वयश्च षोडश निदेशालयाः एकनवतिः ग्रुपमुख्यालयाश्च कुर्वन्ति। राष्ट्रिय कैडेटकोरे इदानीं त्रयोदशलक्षादप्यधिकाः कैडेटाः नामा अंकिताः। अस्मिन् संगठने सर्वधर्माणां सम्प्रदायानाञ्चानुयायिनः कैडेटाः सन्ति, येऽस्य संगठनस्य सर्वासु गतिविधिषु युगपत् भागमधिगृह्णन्ति। क्रीडा-भावनया प्रेरिताः एन.सी.सी. कैडेटाः अस्य नियमित-गतिविधीनां शिविराणां माध्यमेन देशे भ्रातृभावं राष्ट्रियैक्यस्य भावनायाश्च विकासं कुर्वन्ति। एन.सी.सी. गीतं समवेतस्वरेण गायन्तः कैडेटाः समग्र भारतस्यैक्यं भ्रातृभावञ्च सजीवं कुर्वन्ति। एन.सी.सी. इत्यस्याधारशिला एकताऽनुशासनयोः स्थिराऽस्ति। अतोऽस्माकं कैडेटानां हस्तेषु देशस्य भविष्यत् सुरक्षितमस्ति।

एन.सी.सी. कैडेटाः प्रतिक्षणं देशस्य रक्षायै सदैव तत्पराः विद्यन्ते, समुपस्थिते च काले प्राणानपि त्युक्तुम् उद्यताः। एन.सी.सी. संगठनं कैडेटेषु विशुद्धराष्ट्रिय-भावनामुत्पाद्य तान् देश-सेवायाः पुण्यकार्येषु समायोजयति। भारतवर्षस्य स्वतन्त्रतासंग्रामस्य सञ्चालनं प्रायः कैडेटैरेव कृतम्। भारतस्याखिलाञ्चलेषु क्रान्तेर्वह्निः कैडेटैरेव प्रज्जवालिता, यैः स्वत्यागेन आंग्लशासनस्याधारशिला अस्थिरा कृता। एन.सी. सी. संगठनं कैडेटानामाजीविकायाः मार्गं प्रशस्तं करोति। तेभ्यः सेनायां, सीमासुरक्षाबल-केन्द्रियारक्षिबल-राज्यारक्षिबलेषु चाजीविकायाः अवसरान् प्रददाति। भारतस्य भिन्न-भिन्न भू- भागेषु बहवः उद्योगपतयः स्वौद्योगिक क्षेत्रेषु तेभ्यः आजीविका-प्रदाने प्रमुखतयोद्यताः।

अस्य संगठनस्य सर्वश्रेष्ठो लाभस्तु अयमस्ति यदनेन कैडेटाः मनसा वाचा कर्मणा च स्वस्था भवन्ति। अत्र परेडमाध्यमेन कैडेटाः सुगठिताः सुदृढाश्च भवन्ति। अनेन ते सदैव सुखिनो नीरोगाश्च भवन्ति।

यतो हि अत्र प्रशिक्षणाय विभिन्न शिविराणि देशस्य विभिन्नस्थानेषु आयोज्यन्ते। अतस्तैः ऐतिहासिकौद्योगिक-सामाजिक केन्द्राणां भ्रमणस्य शुभावसराः प्राप्यन्ते, यैः तेषां ज्ञानवृद्धिर्भवति, तेषां सृजनात्मककार्येषु प्रतिभा रुचिश्च वर्धते। कोलम्बोयोजनाऽन्तर्गति चयनीकृताः कैडेटाः विदेश-भ्रमणस्यावसरं प्राप्नुवन्ति। एवमनुशासनमेव कैडेट-जीवनस्य प्राणाः, यस्य सुशिक्षा संगठनसम्बन्धेनैव प्राप्तुं शक्यते।

भारतस्य वीरभूमौ वीरतायाः परम्परां जीवयितुं सैनिकशिक्षाया अनिवार्यता भवितव्या। एवं कृत्वा वयमेकस्य अनुशासितस्य सबलस्य च भारतस्य निर्माणं कर्तुं प्रभवामः। एन.सी.सी. सदृशानि संगठनानि मातृ-भूमिरक्षायै जनान् स्वबलिदानं कर्तुं प्रेरयन्ति।

'सर्वदा अग्रगामी भवतु संगठनमिदम् इति प्रार्थ्यते।'

## शब्दार्थ

राष्ट्रियकैडेट कोरः = एन.सी.सी.

युवासंगठनम् = युवकों का संगठन

युगपत् = साथ-साथ, सामूहिक रूप में।

सजीवम् = जीवित।

सञ्चालनम् = शुरूआत।

आजीविकायाः = रोजगार का।

चयनी कृताः = चुने हुए।

निर्मातुम् = बनाने के लिए।

संगठिता = संगठित की गई या बनाई गई।

संस्थापितम् = स्थापित किया गया।

समवेत-स्वरेण = एक आवाज़ में।

तत्पराः = तैयार।

प्रज्ज्वालिता = जलाई गई।

मनसा वाचा कर्मणा च = मन वाणी और कर्म से।

अग्रगामी = उन्नतिशील।

## अभ्यास

1. निम्नलिखित प्रश्नों के उत्तर हिन्दी में लिखें-

(क) एन.सी.सी. का मुख्य उद्देश्य क्या है ?

(ख) एन.सी.सी. का नियन्त्रण एवं समन्वय कौन करता है ?

(ग) एन.सी.सी. से युवकों को क्या-क्या लाभ होते हैं ?

(च) एन.सी. सी. की स्थापना कब हुई ? उसके संस्थापक का नाम लिखो।

2. संस्कृते उत्तरत-

(क) एन.सी.सी. संगठनस्य किं ध्ययेम् ?

(ख) इदानीं एन.सी.सी. संगठने कति कैडेटाः नामा अंकिताः ?

(ग) केन माध्यमेन कैडेटाः सुगठिताः सुदृढा च भवन्ति ?

3. नीचे दिए गए शब्दों में से उचित शब्द चुनकर रिक्त स्थानों की पूर्ति करें-

(आजीविकायाः, संस्थापितम्, अग्रगामि, उद्यताः, अनुयायिनः )

(क) कुञ्जरूमहोदयेन 'राष्ट्रियकैडेटकोर' इति युवासंगठनं------।

(ख) अस्मिन् संगठने सर्वधर्माणां सम्प्रदायानां च---कैडेटाः सन्ति।

(ग) एतत् संगठनं कैडेटानां---- मार्गं प्रशस्तं करोति।

(घ) सर्वदा----भवतु संगठनम् इदम्।

4. यथानिर्दिष्ट परिवर्तन करें-

(क) वयं प्रतिक्षणं देशस्य रक्षायै सदैव तत्पराः । (प्रथम पुरुष में)

(ख) कैडेटाः प्रशिक्षणाय शिविरं गच्छन्ति। (लट् लकार में)

(ग) एतेन संगठनेन कैडेटाः विदेश-भ्रमणस्य अवसरं प्राप्नुवन्ति।

(एकवचन में)

(घ) सः पठितुं विद्यालयं गच्छति। (स्त्रीलिंग में)

5. सन्धि/सन्धिच्छेद करो-

लाभस्तु, कैडेटैः + एव, अप्यस्य, समिति + एका, रुचिश्च, ये + अस्य।

## द्वादशः पाठः

# महर्षिः दयानन्दः

यादृशः युगः आस्ते तादृश एव महापुरुषः जगति अवतरति। यः स्वप्रयत्नेन मानवजातिं पतनात् रक्षति। एतादृशः एव, महापुरुषः 1824 तमे ईसाब्दे गुजरात-प्रान्तस्य 'टंकारा ग्रामे' अजायत। कोऽस्ति स महापुरुषः? खलु महर्षिदयानन्दः अस्ति। तस्य बाल्यस्य अभिधानं मूलशंकरः आसीत्। तस्य पिता अम्बाशंकरः शिवस्य परम भक्तः आसीत्।

मूलशंकरः गुरुं अन्वेष्टुं गृहात् निर्गतः। विविधेषु तीर्थेषु तपोवनेषु च गुरुं अमार्गयत्। अन्ततः मथुरायां गुरुविरजानन्दस्य साक्षात्कारः अभवत्। गुरु-विरजानन्दः जन्मान्धः आसीत् परं धुरन्धरो वेदविद्वान् वैयाकरणः च। स दयानन्दं वेदान् आर्षग्रन्थान् च अपाठयत्।

सम्पन्ने अध्ययने च यदा दयानन्दः दक्षिणारूपेण लवंगैः गुरुं प्रासादयितुं ऐच्छत्-तदा तस्य गुरुः अवदत्- "दयानन्द! अहं अन्यदेव इच्छामि न तु लवंगानि।" दयानन्दः न्यवेदयत्- "गुरुदेव! मम पार्श्वे अन्यत् न किमपि एतस्माद् अतिरिक्तम्?" गुरु विरजानन्दः अकथयत्- "प्रियवत्स! सर्वत्र अज्ञानान्धकारः प्रसृतः। त्वं वेदानां प्रकाशं कृत्वा तं निवारय। ईश्वरः एक एव इति लोकान् शिक्षयतु। भेदभाव रहितस्य समाजस्य स्थापनां कुरु। इयं एव मम दक्षिणा स्यात्।" दयानन्दः सहर्षं इदं स्वीकृतवान्।

महर्षिदयानन्दः वेदप्रचाराय चैत्रमासे शुक्ल पक्षे प्रतिपदा- तिथौ विक्रमी संवत् 1932 तमे (तदनुसारं सप्तम अप्रैल 1875 तमे) ईसाब्दे मुम्बई नगरे आर्यसमाजस्य स्थापनां अकरोत्। तेन ऋग्वेदादिभाष्य-भूमिका, वेद-भाष्याणि, सत्यार्थप्रकाशः, संस्कारविधिः, वेदांग-प्रकाशः, व्यवहारभानुः, गोकरुणानिधिः आदयः ग्रन्थाः रचिताः।

बालविवाह-सतीप्रथा-अस्पृश्यता-अन्धविश्वास-पाखण्ड-रूढिवाद-भेदभाव-सदृशी कुरीतयः तेन दूरीकृताः। 'वेदपठनस्य अधिकारः सर्वेषां एवास्ति' इति तस्य दृढ विश्वासः आसीत्। नारी शिक्षायै स विशेषरूपेण आदिशत्। दलितोद्धाराय अपि स सततं अयतत। वर्णव्यवस्था गुणकर्मानुसारेण एव भवति न तु जन्मना इति स वेदानुसारेण प्रतिपादयति स्म।

स आजन्म ब्रह्मचर्यव्रतं अपालयत्। स यावज्जीवं देशजात्योः हित-साधने एव संलग्नः आसीत्। 1883 तमे ईसाब्दे दीपमालायाः रात्रौ अयं वेदसूर्यः अस्तंगतः।

### शब्दार्थ

अभिधानम् = नाम

अन्वेष्टुम् = खोजने के लिए

अमार्गयत् = खोजा

न्यवेदयत् = निवेदन किया

वैयाकरण: = व्याकरण का ज्ञाता

लवंगै: = लौंग के द्वारा

प्रत्यवदत् = उत्तर दिया

पाखण्ड = दिखावा

जन्मान्ध: = जन्म से अन्धा

धुरन्धर: = महान्, श्रेष्ठ

आर्षग्रन्थान् = ऋषिकृत ग्रंथों को

प्रासादयितुम् = प्रसन्न करने के लिए

प्रसृत: = फैला हुआ

निवारय = दूर करो

अस्पृश्यता = छुआछूत

## अभ्यास

1. नीचे लिखे प्रश्नों के उत्तर हिन्दी में लिखें-
   (क) महर्षि दयानन्द की मृत्यु कब हुई?
   (ख) दयानन्द ने किस समाज की स्थापना की?
   (ग) दयानन्द ने सारा जीवन किस व्रत का पालन किया?
   (घ) दयानन्द ने किन ग्रन्थों की रचना की?
2. संस्कृते उत्तरं लिखत-
   (क) महर्षि दयानन्द: कुत्र अजायत?
   (ख) दयानन्दस्य बाल्यस्य नाम किं आसीत्?
   (ग) दयानन्दस्य गुरु: क: आसीत्?
3. निम्नलिखित शब्दों में से उचित शब्द चुन कर रिक्त स्थान भरें-
   देवान्, गृहात्, अपाठयत्, वेदानाम्, ईश्वर:
   (क) स दयानन्दं वेदान्----।
   (ख) त्वम्----प्रचारं कुरु।
   (ग) मूलशंकर: गुरुं अन्वेष्टुं----निर्गत:।
   (घ) ----एक एव इति लोकान् शिक्षयत्।
4. रेखांकित शब्दों में यथानिर्दिष्ट लकार परिवर्तन करें-
   (क) गुरुविरजानन्द: <u>अकथयत्</u>। (लट् लकार)
   (ख) खलु महर्षि: दयानन्द: <u>अस्ति</u>। (लङ् लकार)
   (ग) तस्य बाल्यस्य अभिधानं मूलशंकर: <u>आसीत्</u>। (लृट् लकार में)
   (घ) स देशजात्यो: हित-साधने एव संलग्न: <u>आसीत्</u>। (लट् लकार)
5. सन्धि/सन्धिच्छेद करो-
   दया + आनन्द:। एतस्मात् + अतिरिक्तम्। अज्ञानान्धकार:। ईसाब्दे। एवास्ति। यावज्जीवम्। जन्म + अन्ध:।

## त्रयोदशः पाठः

# निश्चयं दर्शयति लक्ष्यम्

पुरा वरदराजः नाम बालः यदा पंचवर्षीयः अभवत्। सः अपि अन्यैः, अनेकैः बालैः सह शिक्षार्थं प्रेषितः। आश्रम-व्यवस्थायां विद्याध्ययने सः तत्र आश्रमे एव निवसति स्म। गुरु-सेवां कुर्वन् अन्यैः छात्रैः सह सः अपि विविधानां विषयाणां ज्ञानार्थं प्रायतत्।

तस्य सर्वे सहपाठिनः अध्यापितान् पाठान् शीघ्रमेव मनोगतान् कुर्वन्ति स्म। वरदराजः शरीरेण तु स्वस्थः हृष्टः पुष्टः च आसीत्। परन्तु सः मन्दबुद्धिः उच्छृंखलः च आसीत्। पंचभिः वर्षैः अपि सः नाधिकम् अधीतवान्। तस्य ज्ञानशून्यतां दृष्ट्वा गुरुवरः तं गृहं प्रतिनिवर्तितुम् आज्ञापयत्।

गृहं प्रस्थितः वरदराजः मार्गे अचिन्तयत्- 'गृहं गत्वा अहं पितरं कथं मुखं दर्शयिष्यामि? जनान् किं कथयिष्यामि? किं च जनाः कथयिष्यन्ति-पिता प्रख्यातः पण्डितः, पुत्रः सर्वथा मूर्खः।' अंधकारमयं भविष्यं विचिन्त्य निरुत्साहः भूत्वा सः एकस्य कूपस्य समीपे जलार्थं स्थितः। सः तत्र अपश्यत् स्थाने स्पष्टानि घटचिह्नानि अंकितानि। रज्जू घर्षणेन च कूपं परितः गहनानि चिह्नानि शिलासु अपि अंकितानि। तत्सर्वं पश्यतः तस्य मुखात् निस्सृतम्- 'अहमपि परिश्रमं करिष्यामि, अहमपि विद्वान् भविष्यामि।'

तदा सः मध्याह्ने भोजनं कृत्वा सोत्साहः दृढ-निश्चयी च भूत्वा आश्रमं पुनः आगच्छत्। आचार्यः पुनः दृष्ट्वा आश्चर्येण अपृच्छत्- 'किं त्वं गृहं इदानीं यावत् न प्रस्थितः। तदा परिवर्तित-व्यवहार-दृढप्रतिज्ञः वरदराजः सोत्साहं निज-निश्चयम् अकथयत्- ''अहं परिश्रमं करिष्यामि, पितुरिव विद्वान् भविष्यामि।'' अन्ये छात्राः तं पुनरागतं दृष्ट्वा तस्य उपहासं कुर्वन्ति स्म।

तस्मादनन्तरं कतिपयै मासैरेव सः गुरुणा पाठितं पाठं शीघ्रम् आत्मसात् कर्तुम् आरभत। क्रमेण तस्य गणना परिश्रमशीलेषु पुनः क्रमेण प्रतिभाशालिषु शिष्येषु अभवत्। अध्ययनकाले सः अचिन्त्यत्-पाणिनि कृतं 'अष्टाध्यायी' नामकं सूत्र-व्याकरणम् अतिक्लिष्टम् अस्ति। भट्टोजि-दीक्षित-कृतं 'सिद्धांत-कौमुदी' नाम व्याकरणमपि प्रतिभाशालिनः छात्राः एव पठितुं समर्थाः। अतः वरदराजः सरल-विधिना सूत्राणि

सोदाहरणानि कृत्वा समायोजयत्। एतत् सुविचारितं तस्य व्याकरणं छात्राः शीघ्रमेव ग्रहणं कुर्वन्ति। शिक्षकाः अपि तेन रचितौ ग्रंथौ अद्यापि सहर्षं अध्यापयन्ति। लघुसिद्धान्तकौमुदी मध्यसिद्धान्त कौमुदी च तस्य व्याकरणस्य द्वौ ग्रन्थौ चिरकीर्तिस्तम्भौ इव स्तः।

## शब्दार्थ

पुरा = बहुत पहले
ज्ञानार्थम् = ज्ञान के लिए
मनोगतान् = याद
अधीतवान् = पढ़ लिया
प्रस्थितः = चल दिया
दर्शयिष्यामि = दिखाऊँगा
निमज्जति स्म = डूब रहा था
निस्सृतम् = निकला
इदानीं यावत् = अब तक
उपहासम् = मज़ाक
क्रमेण= धीरे-धीरे
समायोजयत् = बनाया, तैयार किया

प्रेषितः = भेजा गया
प्रायतत् = प्रयत्न करने लगा
उच्छृंखलः = शरारती
प्रतिनिवर्तितुम् = लौटने के लिए
कथं = कैसे
मनसा दृष्ट्वा = विचार करके
रज्जु - घर्षणेन = रस्सी घिसने से
मध्याह्ने = दोपहर में
पुनरागतम् = दोबारा आए हुए को
मनसा धारयति स्म = याद कर लेता था
अतिक्लिष्टम् = बहुत कठिन

## अभ्यास

1. हिन्दी में उत्तर लिखो-
   (क) प्राचीन समय में विद्यार्थी शिक्षा कहां और कैसे प्राप्त करते थे?
   (ख) वरदराज को आचार्य जी ने घर लौट जाने को क्यों कहा?
   (ग) वरदराज क्या प्रतिज्ञा करके गुरुकुल में लौट आया?
   (घ) भट्टोजि दीक्षित ने कौन सा व्याकरण शास्त्र लिखा?
2. संस्कृते उत्तरत-
   (क) कूपं परितः शिलासु चिह्नानि कथं जातानि?
   (ख) पाणिनिकृतस्य व्याकरणस्य किं नाम अस्ति?

(ग) वरदराजरचितौ व्याकरण-ग्रन्थौ कौ स्तः ?

3. रिक्त स्थान भरो-

(वरदराजः, विद्वान्, प्रस्थितः, पंडितः, शिष्येषु )

(क) गृहं---वरदराजः मार्गे अचिन्तयत्।

(ख) तस्य गणना प्रतिभाशालिषु---अभवत्।

(ग) पिता प्रख्यातः--पुत्रः सर्वथा मूर्खः।

(घ) अहं पितुः इव-------भविष्यामि।

4. रेखांकित पद में यथानिर्दिष्ट परिवर्तन करो —

(क) सः मन्दबुद्धिः उच्छृंखलः च आसीत्। (मध्यम पुरुष ए.व. में)

(ख) अहमपि परिश्रमं करिष्यामि। (उत्तम पुरुष बहु व. में)

(ग) वरदराजः सोत्साहं उत्तरम् अयच्छत्। (लट् लकार में)

(घ) अहमपि विद्वान् भविष्यामि। (प्रथम पुरुष में)

5. सन्धि करो

सः + अपि। वर्षैः + अपि। पुनः + च। नाधिकम् । जलार्थम्। सोत्साहः।

### चतुर्दशः पाठः

# सुभाषितानि

केयूराणि न भूषयन्ति पुरुषं, हारा न चन्द्रोज्ज्वलाः,
न स्नानं न विलेपनं न कुसुमं, नालंकृता: मूर्धजाः।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिः न तु कंकणेन।
विभाति कायः करुणा -पराणां
परोपकारैः न तु चन्दनेन॥ 2

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वात् धनमाप्नोति धनाद् धर्मं ततः सुखम्॥ 3

प्रतिकूलतामुगपगते हि विधौ
विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्तुरभूत्
न पतिष्यतः कर-सहस्रमपि॥ 4

यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते, सर्वाः तत्राफलाः क्रियाः॥ 5

तिलेषु तैलं दधिनीव सर्पिः
आपः स्रोतस्स्वरणीषु चाग्निः।
एवमात्मनि गृह्यतेऽसौ
सत्येनैनं तपसा योऽनुपश्यति॥ 6

यथा ह्येकेन चक्रेण, न रथस्य गतिर्भवेत्।
एवं पुरुषकारेण विना दैवं न सिद्ध्यति॥ 7

एक एव सुहृद्धर्मो निधनेऽपि अनुयाति यः।
शरीरेण समं नाशं सर्वमन्यत् तु गच्छति ॥8

हंसः श्वेतः बकः श्वेतः, को भेदः, बकहंसयोः।
नीरक्षीर विवेके तु हंसो हंसः, बको बकः ॥ 9

तुल्यवर्णच्छदः कृष्णः कोकिलैः सह संगतः।
केन विज्ञायते काकः स्वयं यदि न भाषते ॥ 10

## शब्दार्थ

मूर्धजा : = बाल
श्रोत्रम् = कान
पाणिः = हाथ
करुणा पराणाम् = दयाशील (जनों) का
विधौ = भाग्य, विधाता (में, पर)
कर-सहस्रम् = हजारों (किरणें) हाथ
वृत्तिः = स्वभाव
सर्पिः = घी
पुरुषकारेण = परिश्रम से
संस्कृता = पवित्रता
श्रुतेनैव = (शास्त्र) सुनने से ही
कायः= शरीर
पात्रताम् = योग्यता को
अवलम्बनाय = सहारा देने के लिए
स्रोतस्सु = चश्मों में
गृह्यतेऽसौ = वह प्राप्त किया जाता है
अरणीषु = लकड़ियों में

## अभ्यास

प्र.1 निम्नलिखित प्रश्नों के हिन्दी में उत्तर लिखो।

(क) पुरुष का सदैव रहने वाला आभूषण क्या है ?

(ख) विद्या मनुष्य को क्या प्रदान करती है ?

(ग) हंस और बगुले में अन्तर कैसे मालुम होता है ?

प्र.2 संस्कृते उत्तरम् लिखत-

(क) देवताः कुत्र रमन्ते ?

(ख) विनयात् किं प्राप्यते ?

(ग) काकः कथं विज्ञायते ?

(घ) कस्य सहायतां विना दैवं न सिद्ध्यति ?

प्र.3 नीचे दिए गए शब्दों से रिक्त स्थान भरो।

पुरुषकारेण, मनुष्येण, कुण्डलेन, काकः, सर्पिः।

(क) श्रोत्रं श्रुतेनैव न--------।

(ख) तिलेषु तैलं दधिनीव-----।

(ग) केन विज्ञायते---स्वयं यदि न भाषते।

(घ) -----विना दैवं न सिद्ध्यति।

## पञ्चदशः पाठः

# सुभाष-चन्द्र-बोसः

'नेता जी' इति उपाधिना एव जनाः सैनिक-वेषधारिणं नेतारं सुभाष-बोसं स्मरन्ति। उड़ीसा प्रदेशे 'कटक' नाम नगरं सः भारत-रत्नः स्वजन्मना अलंकृतवान्। तस्य पिता रायबहादुरः ज़ानकीनाथः बोसः माता च प्रभावती आसीत्।

स्वामिनः विवेकानन्दस्य प्रभावेण सः सत्यस्य अन्वेषणार्थम् षण्मासपर्यन्तम् अतिदुर्गमेषु हिमलायस्य शिखरेषु अपि व्यचरत्। 'जलियांवाला' उपवनस्य दुर्घटना तं विदेशीशासनं प्रबलप्रहारैः समूलम् उन्मूलयितुं प्रैरयत्।

स्वतन्त्रता संग्रामे स गांधिमहोदयस्य 'असहयोग-आंदोलनस्य एव समर्थकः आसीत्। तेन तस्य अहिंसानीतयः कदापि न समर्थिताः। सः देश-बन्धुनः चितरंजनदासस्य सहयोगेन 'स्वयंसेवक सेना' दलस्य संगठनम् अकरोत्। 1922 तमे ईसाब्दे सः अनया सेनया जलप्लावन-पीडितानां सहायताम् अकरोत्।

वीरः सुभाषः प्रगतिवादी क्रान्तिकारी च आसीत्। अधिकारप्राप्तये सः याचनां न समर्थयति स्म। सः पंगुं स्वराज्यं न इच्छति स्म।

द्वितीय-विश्वयुद्ध-काले यदा सः गृहे एव बंदी कृतः, तदा छलपूर्वकं सः रेलयानेन कलकत्ता नगरात् पेशावरं ततः च काबुल-नगरम् प्रापत्। स गुप्तचरेभ्यः प्रच्छन्नः भूत्वा इटली देशस्य राजदूतम् अमिलत्।

जर्मनी रेडियोयन्त्रात् स्वतन्त्रता-नायकस्य सुभाषस्य सिंह-गर्जनां श्रुत्वा ब्रिटिश-सर्वकारः चकितः अभवत्। एतदनन्तरं तेन मलाया-देशे-आज़ाद-हिन्द-सरकार इति नाम्ना प्रशासन व्यवस्था प्रारब्धा। मलाया देशे उपस्थिताः सहस्रशः भारतीयाः 'आज़ाद हिन्द-फौजस्य' सैनिकाः अभवन्। तत्र नासीत् जात्याः धर्मस्य वा भेदः। 'जय हिन्द एव अभिवादनम् आसीत्, रोमन-लिप्यां हिन्दुस्तानी भाषायाः प्रचलनम् अभवत्।

बर्मा देशे रंगून-नगरस्य 'ज्यूबलीहालम्' भारतीयानां 'जय-हिन्द' तथा भारतनायकः सुभाषचन्द्रः बोसः- 'जिन्दाबाद' आदिभिः उच्चैः घोषणा स्वरैः, गुंजितम् अभवत्। तस्य भाषणेन सर्वे भारतीयाः वीरत्वपूरिता अभवन्। सः स्वतंत्रतायाः मूल्यं दातुं जनान् प्रैरयत्-

यूयं मह्यम् रक्तं यच्छत, अहं वः स्वतन्त्रतां दास्यामि।

तदा अनेकाः वीरांगणाः वीराः च प्रतिज्ञापत्रे निजरक्तेन हस्ताक्षरं अकुर्वन्। ते 'आजाद-हिन्द-सेना' इत्यस्य सैनिकाः अभवन्। प्रशिक्षिताः सैनिकाः भूत्वा ते कोहिमा-इम्फाल क्षेत्रेषु ब्रिटिश-सेनया सह युद्धम् अकुर्वन्। दुर्भाग्येन जापानः जर्मनी च पराजितौ। तयोः देशयोः सहायता-अभावे सफलता संभवा नासीत्।

सुभाषबोसः सेनायाः पुनर्गठनं कर्तुम् विमानेन जापान-यात्राम् अकरोत्। विमान-दुर्घटनायाः समाचारेण 'आज़ाद-हिन्द-सेनायाः' स्वप्नानि छिन्न-भिन्नानि कृतानि। तथापि तेषां प्रयत्नैः ब्रिटिश-सर्वकारस्य आसनम् अदोलयत्।

अद्य स्वतन्त्रे भारते वयं सुखेन जीवामः। स्वतन्त्रता संग्रामस्य वीरान् क्रान्तिकारिणः स्मरामः। धन्यास्ते वीराः, ये देशहिताय स्वप्राणान् अपि अत्यजन्।

## शब्दार्थ

स्मरन्ति = याद करते हैं

पर्यन्तम् = तक

अनुमोदनम् = समर्थन

सर्वकारस्य = सरकार का

सहस्रशः = हज़ारों

छिन्नभिन्नानि = चूर-चूर हो गए

अदोलयत् = हिल गया

अलंकृतवान् = सुशोभित किया

प्रच्छन्नः = छिपकर

जलप्लावनम् = बाढ़

प्रारब्धा = आरम्भ की गई

वीरांगणाः = वीर-स्त्रियां

उन्मूलयितुम = जड़ से उखाड़ने के लिए

## अभ्यास

प्र.1 हिन्दी में उत्तर लिखो–

(क) 'नेता जी' यह उपाधि नाम हमें किस स्वतन्त्रता सेनानी की याद दिलाती है?

(ख) सुभाष चन्द्र बोस ने किस के सहयोग से किस दल का संगठन कि

(ग) नेता जी काबुल कैसे पहुँचे?

(घ) नेता जी ने बर्मा में हुई सभा में भारतवासियों से स्वतंत्रता के लिए क्या मांग की ?

प्र. 2 संस्कृते उत्तरं लिखत-

(क) सुभाषचन्द्र बोसस्य जन्म कस्मिन् नगरे अभवत् ?

(ख) तस्य सेनाया: किं नाम् आसीत् ?

(ग) वीरा: प्रतिज्ञा-पत्रे केन हस्ताक्षरम् अकुर्वन् ?

प्र. 3 नीचे लिखे शब्दों से रिक्त स्थान भरो-

(पंगुम्, प्राप्त्ये, आंदोलनस्य, प्रच्छन्न: , जानकीनाथ: )

(क) तस्य पिता -----माता च प्रभावती आसीत्।

(ख) स: 'असहयोग----' समर्थक: आसीत्।

(ग) स:----स्वराज्यं न इच्छति स्म।

(घ) अधिकार----स: याचनां न समर्थयति स्म।

प्र.4 यथानिर्दिष्ट परिवर्तन करो-

(क) स: प्रगतिवादी क्रान्किारी आसीत् (लट् लकार में)

(ख) स: गुप्तचरेभ्य: प्रच्छन्न: भूत्वा गच्छति स्म (बहुवचन में)

(ग) अद्य स्वतन्त्रे भारते वयं सुखेन जीवाम:। (प्रथम पुरुष)

(घ) स: स्वतंत्रताया: मूल्यं दातुं जनान् प्रैरयत्। (स्त्रीलिंग में)

प्र.5 सन्धि/सन्धिविच्छेद करो

अन्वेषणार्थम्। अनु + अमोदयत्। ईसाब्दे । हस्त + अक्षरम्। न + आसीत्, पुनर्गठनम्।

## षोडश: पाठ:

# संस्कृतस्य गौरवम्

संस्कृतमेव भारतीय-संस्कृते: गौरवमयस्य इतिहासस्य जीवनम्। वेदानां दिव्यं ज्ञानं संस्कृत-माध्यमेन एव जनै: हृदयंगमं कृतम्। किं च एषा भाषा एव तदा लोकभाषा आसीत्। केचित् मुनय: वेदानां ऋच: दृष्टवन्त :। ते ऋषय: ता: दृष्टा: ऋच: लिपिबद्धा: कृतवन्त:। ऋच: एव मन्त्रा:। ते ऋषय: तान् मन्त्रान् विस्तृतै: अर्थै: निज-शिष्यान् शिक्षितवन्त:। एते अर्था ब्राह्मण ग्रन्थेषु सुरक्षिता:। तेषां व्याख्यां 'आरण्यक' नाम-ग्रन्थेषु कृता।

लौकिकभाषायां सर्वप्रथमं महाकाव्यं 'रामायणम्' जनमानसस्य प्रियम् अभवत्। तस्य लेखक: महर्षि: बाल्मीकि: च 'आदिकवि:' इति संज्ञाम् प्राप्तवान्

लोकभाषा लिपिबद्धा जाता। साहित्ये ज्ञानं संचितम्। 'लक्ष-श्लोक-परिमिते 'महाभारत'- काव्ये भूतस्य-वर्तमानस्य भविष्यस्य च सर्वं ज्ञानं संचितम्। धर्म-दर्शन ज्योतिष राजनीति-इतिहास-विज्ञान-संस्कृति- आदीनां बहूनां विषयाणां ज्ञानम् अस्मिन् महाकाव्ये संचितम्। महाभारते राम-कथा अपि लिखिता अस्ति। अन्येषामपि महतां ग्रन्थानां परिचयम् मिलति। सर्वेषां धर्माणाम् आधार: 'श्रीमद्भगवत्-गीता' अपि अस्यैव अंश:।

आचार्य: पाणिनि: निजे 'अष्टाध्यायी' नाम व्याकरण-शास्त्रे पूर्वं भूतानां अष्टानां वैयाकरणानाम् उल्लेखम् अकरोत्। निघण्टु निरुक्त सदृशा: ग्रन्था: भाषाया: गहनाध्ययने सहायका: सन्ति। पतंजले: योग शास्त्राणि स्वास्थ्य-रक्षायां सहायका: सन्ति। अग्निवेश -चरक-सुश्रुत-आदीनां आयुर्वेदज्ञानम् अद्यापि चिकित्सा-शास्त्रे साहाय्यं करोति। आर्यभट्ट- वराहमिहिरादीनां ज्योतिष् सिद्धान्ता: अद्यापि अन्तरिक्षस्य घटनाचक्रं सटीकं वर्णयन्ति। जयपुरस्य 'जन्तर-मन्तर' नामा अंतरिक्ष प्रयोगशाला अद्यापि वैज्ञानिकानां कृते कौतूहलस्य विषय: अस्ति।

चाणक्यस्य अर्थशास्त्रम् एव आधुनिकस्य अर्थशास्त्रस्य राजनीति-शास्त्रस्य च जीवनाधार:। विविधविध-कथा-साहित्यं नाटकानि, काव्यानि, गद्यकाव्यानि च रसिकानां विदुषाम् मन: मोहयति। जनेभ्य: विविधानां विषयाणां ज्ञानम् अपि च यच्छन्ति। संस्कृतमेव

बहूनां भारोपीय-परिवारस्य भाषाणां जीवनाधारो अभवत्। एषा भाषा एव सम्पूर्णे राष्ट्रे अनेकतायाम् एकतायाः संदेशम् यच्छति।

वास्तु-ज्योतिषः विदुषां कृते एषा भाषा आजीविकायाः उत्तमं साधनम् अस्ति। धर्मकार्येषु ते विदुषः एव सादरं स्वीक्रियन्ते, ये संस्कृतस्य पण्डिताः सन्ति। पुरातत्व-विभागः तु संस्कृतं विना जीवितुम् न शक्नोति। विविध-विध- यन्त्रनिर्माणे संस्कृतग्रन्थाः अद्यापि वरदानरूपाः सन्ति।

एतावत् लाभप्रदायां वैज्ञानिक-भाषायां कथं न स्यात् छात्राणां रुचिः ?

अस्याः ज्ञानेन तु दिशाहीनाः छात्राः अपि जीवनस्य लक्ष्यं प्राप्नुवन्ति। तेऽपि यशः सुखं च लभन्ते, ये तु दिशाज्ञानसम्पन्नाः छात्राः तेषां चरमोन्नतौ कः सन्देहः। संस्कृतस्य प्रवृत्तिः सर्वहितकारिणी अस्ति। तद् यथा-

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चित् दुःख-भाग्भवेत्॥

## शब्दार्थ

दिव्यं ज्ञानम् = अलौकिक ज्ञान
ऋचः = मन्त्र
संचितम् = इकट्ठा किया
सटीकं = बिल्कुल सही
बहुधा = कई प्रकार से
एतावत् = इतने
भद्राणि = कल्याण (बहुवचन)
दुखभाक् = दुःखी
हृदयंगमं कृतम् = याद कर लिया
आदिकविः = पहला कवि
गहनाध्ययने = विशेष अध्ययन में
कौतूहलस्य = हैरानी का
विदुषांकृते = विद्वानों के लिए
निरामयाः = नीरोग (बहुवचन)
कश्चित् = कोई

## अभ्यास

1. हिन्दी में उत्तर लिखो-

(क) 'आदिकवि' किसको कहा गया ? लौकिक भाषा में 'आदिकाव्य' किसे कहा गया और क्यों ?

(ख) महाभारत में किन-किन विषयों का ज्ञान मिलता है ?

(ग) संस्कृत-साहित्य के कौन कौन से रूप हैं ?

2. संस्कृते उत्तरं लिखत-

(क) ऋचः के दृष्टवन्तः ?

(ख) पाणिनिः निजे व्याकरण-ग्रन्थे कतिनां वैयाकरणानाम् उल्लेखमकरोत् ?

(ग) पुरा चिकित्सा शास्त्रस्य के विद्वांसः अभवन् ?

3. नीचे लिखे शब्दों से रिक्त स्थानों की पूर्ति करो-

(कौतूहलस्य, भाषायाः, आदिकविः, राम-कथा, जीवितुम् )

(क) तस्य लेखकः महर्षि बाल्मीकिः----इति संज्ञाम् प्राप्तवान्।

(ख) महाभारते------अपि लिखिता अस्ति।

(ग) पुरातत्व विभागः तु संस्कृतं विना------न शक्नोति।

(घ) जन्तर मन्तर नामा अंतरिक्ष प्रयोगशाला वैज्ञानिकानां कृते----विषयः अस्ति।

4. यथानिर्दिष्ट परिवर्तन करके लिखो

(क) मुनयः वेदानां ऋचः दृष्टवन्तः। (एकवचन में)

(ख) सर्वे भवन्तु सुखिनः। (लट् लकार में )

(ग) ते यशः लभन्ते। (स्त्रीलिंग में)

(घ) सः जीवनलक्ष्यं प्राप्नोति । (बहु वचन में)

5. सन्धि/सन्धिच्छेद करो-

ज्योतिषश्च। एतदेव। एको देवः। अन्येषाम् + अपि। उत् + लेखः। अद्य + अपि।

## सप्तदश: पाठ:

# लाला लाजपतराय:

राधाकृष्ण: पिता धन्य:, सुजन: शिक्षकोत्तम: ।
धन्या गुलाबदेवी च माता सद्धर्म-चारिणी ॥1॥
ययो: गृहे जन्म लेभे, सुत: पञ्जाब-केसरी ।
लाला-लाजपतो धीमान् स्तौति यद्गौरवं जगत् ॥2॥
हुतात्मा देशसेवी स यावज्जीवममन्यत ।
निजाधिकार-संरक्षां शाश्वतं धर्ममुत्तमम् ॥3॥
राष्ट्रोत्थान-प्रतिज्ञैव तदीयाऽऽसीत् सुभावना ।
मानवाराधनं चैव तस्य देवार्चनं परम् ॥4॥
न्याय-प्रिया मतिस्तस्य सत्य-न्यायालयेऽभवत् ।
अदम्या लेखनी चैव तस्यासीत् सम्पदुत्तमा ॥5॥
मानसं मन्दिरं पुण्यं, मातृभूर्देवता परा ।
अन्याय-दमनं लोक-सेवा चैव दृढं व्रतम् ॥6॥
अशस्त्र-योद्धुरभयस्यांग्ल-सार्जंट-यष्टिभि: ।
आहतस्य समुद्घोष: तस्य सत्यमजायत ॥7॥
"मत्काये पातिता यष्टि: आंग्ल-साम्राज्य-कप्फणे ।
शीघ्रं यास्यति कीलत्वं सत्यमेतद्वदाम्यहम्" ॥8॥
इति तद्गर्जितं भीमं लोकानां रोमहर्षणम् ।
अद्यापि वैरिणां चेतोध्रुवं मंथति नित्यश: ॥9॥
भारतीया जना: अद्य राष्ट्रोन्नति-समुत्सुका: ।
तन्मार्ग-दर्शनं पुण्यं समीहन्ते समाहिता: ॥10॥

### शब्दार्थ

धीमान् = बुद्धिमान
ययो: = जिन (दो) के
हुतात्मा = शहीद
शाश्वतम् = नित्य
देवार्चनम् = देवपूजा
भीम = भयंकर

समीहन्ते = (सम √ईह्, लट्, प्र० पु० ब० व०) चाहते हैं

जन्मन् = जन्म

यावत्-जीवम् = जीवन भर

रोमहर्षणम् = रोंगटें खड़े कर देने वाला

समुद्घोष: = घोषणा

पातिता = गिराई हुई

ध्रुवम् = निश्चय से

यष्टिभि: = लाठियों से

मंथति = मंथन करता है

## अभ्यास

1. हिन्दी में उत्तर दो।
   (क) लाला लाजपतराय के माता-पिता का नाम बताओ।
   (ख) लाला लाजपतराय को पंजाब-केसरी क्यों कहते हैं ?
   (ग) लाला लाजपतराय पर लाठी किसने चलाई थी ?
   (घ) लाठी प्रहार के समय लाला लाजपतराय ने क्या घोषणा की ?
2. **संस्कृते उत्तरं लिखत—**
   (क) पञ्जाब-केसरी कयो: गृहे जन्म लेभे ?
   (ख) लाला लाजपतराय मतेन क: उत्तम: धर्म: ?
   (ग) लाला लाजपतराये क: यष्टि-प्रहारम् अकरोत् ?
3. नीचे दिए गए शब्दों से रिक्त स्थानों की पूर्ति करो।

   आंग्ल साम्राज्य, भारतीया, न्यायाप्रिया, गुलाबदेवी, पंजाब-केसरी

   (क) धन्या-----च माता सद्धर्म चारिणी।
   (ख) ययो: गृहे जन्म लेभे, सुत:-----।
   (ग) मत्काये पातिता यष्टिर:-------कम्फणे।
   (घ) ---जना: अद्य राष्ट्रोन्नति समुत्सुका:।
4. **यथानिर्दिष्ट लकार-परिवर्तन करो—**
   (क) स निजाधिकार-संरक्षां धर्मम् **अमन्यत**। (लट् लकार में)
   (ख) स वैरिणां चेतो **मंथति**। (बहुवचन में)
   (ग) सत्यमेतद् वदामि अहम्। (प्रथम पुरुष)
5. **सन्धिच्छेद करो—**

   हुतात्मा । देवार्चनम् , सम्पदुत्तमा । अद्यापि । राष्ट्र +उत्थान। तत् + मार्गम्।

## अष्टादश: पाठ:

# सिंह: पंजराद् बहिर्गत:

पुरा भारतम् अनेकेषु राज्येषु विभक्तम् आसीत्। मगध राज्ये नन्दवंशीयस्य महापद्मस्य शासनम् आसीत्। एकदा तस्य राजसभायां केचित् दूता: रोम-देशात् समागता:। ते एकां पिंजरस्थां सिंह-प्रतिमाम् आनयन्। स: च पिंजरस्थ: सिंह: सभा भवन मध्ये स्थित: आसीत्। सर्वे सभासद: तं अनिमेषं पश्यन्ति स्म।

यदा राजा सभायाम् उपस्थित: तदा ते राजदूता: तस्मै बहुमूल्यान् उपहारान् अयच्छन्। ते राजानम् अकथयन्-महाराज! अस्माकं सम्राट् एकमन्यमपि उपहारं भवते प्रेषितवान्। राजा अपृच्छत्-तत् किम्? ते प्रत्यवदन्- 'पंजरस्थ: स: सिंह:। एतत् पंजरं न तु उद्घाटनीयं न च त्रोटनीयं तथापि सिंह: बहिर् करणीय:।'

राजा महापद्म निजं महामात्यं शकटारम् एतत् घोषयितुम् आदिशत्- 'य: सभासदनस्थं पंजरबद्धं सिहं पणानुसारेण बहि:. करिष्यति, तस्मै राजा विपुलं पुरस्कारं दास्यति, परन्तु अफलीभूत: प्रतियोगी मृत्युदण्डं प्राप्स्यति दूरस्था अपि जना: घोषणां श्रुत्वां तं सिंहम् द्रुष्टम् समागता:। पुरस्कारं तु सर्वे इच्छन्ति स्म, मृत्युदण्डं क: वांछति? विशालायां सभायामपि सर्वे जना: अन्योऽन्यस्य मुखं पश्यन्ति स्म। न कश्चित् भाग्योदयार्थम् उदतिष्ठत्। क्रुद्ध: राजा एवमुवाच "किं सम्भूतम्, मगधस्य बुद्धि: कुत्र गता? नास्ति एकोऽपि एतादृश: ज्ञानी, य: इमं सिंहं बहि: कर्तुं समर्थ:?"

स्वाभिमानिन: स्वदेशस्य अपमानं न सहन्ते। तदा एक: षोडशवर्षीय: किशोर: सम्मुखमागत:। स: अकथयत् "महराज! माम् आज्ञापय।" नृपोऽवदत् -"चेत् त्वं सफल: न अभविष्य:, तदा मृत्युदंड प्राप्स्यसि।" स: बालक: निर्विकार: निर्भीक: च भूत्वा पंजरसमीपम् अगच्छत्। किंचित्कालं सुविचार्य स: तत् पिजरं जलमग्नं कर्तुम् आदिशत्। सेवका: तथैव अकुर्वन्। यदा तत् पिंजरं बहि: निष्कासितं स: बालक: ध्यानेन जलाक्लिन्नां प्रतिमाम् अपश्यत्। तदनन्तरं स: पंजरं परित: पावक- प्रज्वालनार्थम् आदिशत्। राजसेवका: शीघ्रमेव तस्य आदेशम् अपालयन्। ते भयात् विवर्णवदना: अभवन्। ते चिन्तयन्ति स्म,-एष: बालक: श्व: प्रभातं न द्रक्ष्यति। सभायामपि जना: तस्य मृत्युदण्डस्य

घोषणा-विषये विचारयन्ति स्म।

शनैः शनैः अग्नि ज्वालाभिः तप्तः सः लाक्षानिर्मित-सिंहः द्रवितुम् आरब्धः। जनाः अपश्यन् यत् पिंजरस्थ सिंहः द्रवितलाक्षारूपेण बहिरागतः। मगधराजः महापद्मः अतितरां प्रासीदत्। सेवकाः सभासदः चापि प्रसन्ना अभवन्। सर्वत्र मगध नरेशस्य किशोरस्य च जयघोष-ध्वनिः श्रूयते स्म। राजदूताः अपि तस्य बालकस्य बुद्धिकौशलं आशंसितवन्तः।

सम्राट् नन्दः प्रसन्नमनसा महामन्त्रिणम् आदिशत् यत् एषः किशोरः पुरस्कारेण सम्माननीयः स्यात्। सः एव निर्भीकः किशोरः युवा भूत्वा चन्द्रगुप्त मौर्यः नाम्ना ख्यातः। सः विशालस्य मौर्यराज्यस्य स्थापनाम् अकरोत्। धन्यः सः भारत-गौरववर्धकः।

## शब्दार्थ

पुरा = पहले

पंजरस्थ = पिंजरे में स्थित

विवर्ण-वदना = घबराये हुए

लाक्षनिर्मितम् = लाख से बना हुआ।

ख्यात : = प्रसिद्ध

मोचनीय = छोड़ने योग्य

समागताः = आए

उद्घाटनीयं = खोलना

प्रतिमाम् = मूर्ति को

प्रेषितवान् = भेजा

निर्विकारम् – विकार रहित या धैर्यपूर्वक

द्रक्ष्यति = देखेगा

प्रासीदत् = खुश हुआ

अनिमेषं = बिना पलक झपके

त्रोटनीयं = तोड़ना

श्वः = कल

## अभ्यास

1. हिन्दी में उत्तर लिखो-

   (क) महापदम् नन्द कहां के राजा थे ? उनकी राजसभा में किस देश के राजदूत आए।

   (ख) मगधनरेश ने क्या घोषणा करवाई ?

(ग) घोषणा सुनकर भी लोग पिंजरे में बन्द सिंह को बाहर निकालने से क्यों डरते थे?

(घ) पिंजरे के चारों ओर आग लगाने पर लोग क्या सोचने लगे?

2. संस्कृते उत्तरं लिखत–

(क) मगधनरेशस्य महामात्यस्य किम् नाम आसीत्?

(ख) पंजरस्थं सिहं कः बहिः करोत्?

(ग) मौर्यराज्यस्य संस्थापकः कः आसीत्

3. निम्नलिखित शब्दों में से उचित शब्द चुनकर रिक्त स्थानों की पूर्ति करें–

(करणीयः, पंजरं, पुरस्कारं, बुद्धिः, सिंहः)

(क) एतत्---न तु उद्घाटनीयं , न च त्रोटनीयम्

(ख) तथापि सिंहः बहिः ---।

(ग) तस्मै राजा विपुलं ---दास्यति।

(घ) मगधस्य------कुत्र गता।

4. सन्धि/सन्धिच्छेद करो

समागताः। अन्योऽन्यस्य । बहिः + कर्तुम्। निः + काषितः। निः +भीकः । निर्विकारः।

✿✿✿

## नवदशः पाठः

# वसन्तसेना-हृदयम्

चेटी— कथम् अद्यापि आर्या न विबुध्यते ? भवतु, प्रविशय प्रतिबोधयिष्यामि। (इति नाट्येन परिक्रामति)

(ततः प्रविशति आच्छादितशरीरा प्रसुप्ता वसन्तसेना)

चेटी— (निरूप्य) उत्तिष्ठतु उत्तिष्ठत्वार्या। प्रभातं संवृत्तम्।

वसन्तसेना— (प्रतिबुध्य) कथं रात्रिरेव प्रभातं संवृत्तम्।

चेटी— अस्माकमेतत् प्रभातम्, आर्यायाः पुनः रात्रिरेव।

वसन्तसेना— चेटि ! कुतः पुनर्युष्माकं द्यूतकरः ?

चेटी— आर्ये ! वर्धमान कं समादिश्य पुष्पकरण्डकं उद्यानं गतः आर्यचारुदत्तः।

वसन्सेना— किं समादिश्य ?

चेटी— योजय रात्रौ प्रवहणं, वसन्तसेना गच्छतु इति।

वसन्तसेना— चेटि ! कुत्र मया गन्तव्यम् ?

चेटी— आर्ये ! यत्र चारुदत्तः।

वसन्सेना— (चेटीं परिष्वज्य) चेटि ! सुष्ठु न निध्यातो रात्रौ, तदद्य प्रत्यक्षं प्रेक्षिष्ये चेटि ! किं प्रविष्टाऽहम् इह आभ्यान्तर -चतुःशालकम् ?

चेटी— न केवलमभ्यन्तरचतुः शालमकम्, सर्वजनस्यापि हृदयं प्रविष्टा।

वसन्सेना— अपि सन्तप्यते चारुदत्तस्य परिजनः ?

चेटी— संतप्स्यति।

वसन्तसेना— कदा ?

चेटी— यदा आर्या गमिष्यति।

वसन्तसेना— (सानुनयम्) तदा मया प्रथमं संतप्तव्यम्। चेटि गृहाणैतां रत्नावलीम्। भगिन्यै आर्यधूतायै गत्वा समर्पय, वक्तव्यं च—अहं श्रीचारुदत्त गुणनिर्जिता दासी, तदा युष्माकमपि, तदेषा तवैव कण्ठाभरणं भ

रत्नावली।

चेटी— आर्ये! कोपिष्यति चारुदत्त आर्यायै तावत्।

वसन्तसेना— गच्छ, न कोपिष्यति।

चेटी— (गृहीत्वा) यदाज्ञापयति। (इति निष्क्रम्य पुनः प्रविशति) आर्ये! भणत्यार्या धूता—'आर्यपुत्रेण युष्माकं प्रसादीकृता, न युक्तं ममैतां ग्रहीतुम्। आर्यपुत्र एवं ममाभरणविशेष इति जानातु भवती।'

(ततः प्रविशति दारकं गृहीत्वा रदनिका)

रदनिका— एहि वत्स! शकटिकया क्रीडावः।

दारकः— (सकरुणम्) रदनिके ! किं ममैतया मृत्तिकाशकटिकया? तामेव सौवर्णशकटिकां देहि।

रदनिका— (सनिर्वेदं निः श्वस्य) जात! कुतोऽस्माकं सुवर्ण-व्यवहारः? तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि। तद्यावद् विनोदयाम्येनम्। आर्यवसन्तसेनायाः समीपमुपसर्पिष्यामि। (उपसृत्य) आर्ये! प्रणमामि।

वसन्तसेना— रदनिके! स्वागतं ते। कस्य पुनरयं दारकः?

अनलंकृतशरीरोऽपि चन्द्रमुखः आनन्दयति मम हृदयम्।

रदनिका— एष खलु आर्यचारुदत्तस्य पुत्रो रोहसेनो नाम।

वसन्तसेना- (बाहू प्रसार्य) एहि मे पुत्रक ! आलिंग।

(इति अंके उपवेश्य) अनुकृतमनेन पितु रूपम्।

रदनिका— न केवल रूपम्, शीलमपि तर्कयामि। एतेनार्य-चारुदत्त आत्मानं विनोदयति।

वसन्तसेना— अथ किं निमित्तमेष रोदिति?

रदनिका— एतेन प्रातिवेशिक-गृहपति-दारकस्य सुवर्णशकटिकया'क्रीडितम्, तेन च सा नीता, ततः पुनस्तां याचमानस्य मयैयं मृत्तिकाशकटिका कृत्वा दत्ता। ततो भणति-'रदनिके! किं ममैतया मृत्तिकाशकटिकया?

तामेव सौवर्णशकटिकां देहि'इति।

वसन्तसेना— हा धिक्, हा धिक्, अयमपि नाम परसंपत्या संतप्यते। भगवन् कृतान्त ! पुष्कर-पत्र-पतित-जल-बिन्दु- सदृशैः क्रीडसि त्वं पुरुषभागधेयैः। (सासूयं) जात ! मा रुदिहि। सौवर्णशकटिकया क्रीडिष्यसि।

दारकः— रदनिके! कैषा ?

वसन्तसेना— ते पितुः गुणनिर्जिता दासी।

रदनिका— जात! आर्या ते जननी भवति।

दारकः— रदनिके! अलीकं त्वं भणसि, यदि अस्माकमार्या जननी, तत् किमर्थमलङ्कृता ?

वसन्तसेना— जात! मुग्धेन मुखेनातिकरुणं मन्त्रयसे। (नाट्येनाभरणान्यवतार्य) एषेदानीं ते जननी संवृत्ता, तद्गृहाणैतम् अलंकारकम्, सौवर्णशकटिकां कारय।

दारकः— अपेहि, न ग्रहीष्यामि, रोदिषि त्वम्।

वसन्तसेना— (अश्रूणि प्रमृज्य) जात! न रोदिष्यामि। गच्छ क्रीड (अलंकारैर्मृच्छकटिकां पूरयित्वा) जात! कारय सौवर्णशकटिकाम्।

(निष्क्रान्ताः सर्वे)

## शब्दार्थ

प्रतिबोधयिष्यामि = जगाऊँगी
योजय = नियुक्त करना
मृत्तिकाशकटिकया = मिट्टी की गाड़ी से।
आनन्दयति = आनन्दित करता है।
विनोदयति = मजाक करता है
सौवर्णशिकटिका = सोने की गाड़ी
निर्जिता = जीती हुई।

चेटी= दासी
निष्क्रम्य = निकल कर
दारकः = पुत्र
भणति = कहता है
कारय = बनवा लो
कण्ठाभरणम् = गले का गहना

## अभ्यास

1. प्रश्नों के उत्तर हिन्दी में लिखें-
   (क) रोहसेन किसका पुत्र था ?
   (ख) रोहसेन कैसी गाड़ी से खेल रहा था ?
   (ग) वसन्तसेना रोहसेन को खेलने के लिये क्या देना चाहती थी ?
   (घ) चारुदत्त कहाँ गया हुआ था ?
2. संस्कृते उत्तरं लिखत-
   (क) रोहसेन: किमर्थम् अरोदत् ?
   (ख) वसन्तसेना रोहसेनं दृष्ट्वा किम् उक्तवती
   (ग) वसन्तसेना रोहसेनस्य जननी कथं संवृत्ता ?
3. नीचे दिए गए शब्दों में से उचित शब्द चुनकर रिक्त स्थानों की पूर्ति करें-
   (चारुदत्तस्य, रत्नावलीं, जननी, मृत्तिका, पितुः )
   (क) किं मम एतया -----शकटिकया।
   (ख) अनुकृतम् अनेन-----रूपम् ?
   (ग) वसन्तसेनया आर्यायै धूतायै----प्रेषिता।
   (घ) रोहसेन:----पुत्रः आसीत्।
4. सन्धि/सन्धिच्छेद करो—
   रात्रि: + एव। कंठ + आभरणम्। गृहाण + एताम्। अभारणान्यवतार्य। शीलमपि। निर्जिता।

# विंशः पाठः

# मालविकाग्निमित्रम्

## प्रथमोअंकः

**( नान्द्यन्ते )**

सूत्रधारः : (नेपथ्याभिमुखम् अवलोक्य) अलम् अतिविस्तरेण । मारिष इतः तावत् ।

**( प्रविश्य )**

पारिपार्श्विकः : भाव, अयम् अस्मि ।

सूत्र० : अभिहितोऽस्मि विद्वत्-परिषदा कालिदास-ग्रथित-वस्तु मालविकाग्नि-मित्रं नाम नाटकम् अस्मिन् वसन्तोत्सवे प्रयोक्तव्यमिति। तद् आरभ्यतां संगीतकम् ।

पारि० : मा तावत् । प्रथित-यशसां भास-सौमिल्ल-कविपुत्रादीनां प्रबन्धान् अतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं बहुमानः ?

सूत्र० : अयि, विवेक-विश्रान्तम् अभिहितम् पश्य—

पुराणमित्येव न साधु सर्वं,
न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते,
मूढः पर-प्रत्यय-नेय-बुद्धिः ॥1॥

पारि० : आर्यमिश्राः प्रमाणम् ।

सूत्र० : तेन हि त्वरतां भवान् ।

**( निष्क्रान्तौ )**

## इति प्रस्तावना

(ततः प्रविशति बकुलावलिका)

बकु० : आज्ञप्ताऽस्मि देव्या धारिण्या अचिर-प्रवृत्तोपदेशं छलिकं नाम नाट्यम् अन्तरेण कीदृशी मालविका इति नाट्याचार्यम् आर्यगणदासं प्रष्टुम् ।

तत् तावत् संगीत-शालां गच्छामि (परिक्रामति)

(ततः प्रविशति आभरण-हस्ता कौमुदिका)

बकु॰ : (कौमुदिकां दृष्ट्वा) सखि कौमुदिके, कुतः ते इदानीम् इयं धीरता, यत् समीपेनापि अतिक्रामन्ती इतो दृष्टिं न ददासि ?

कौमु॰ : अहो बकुलावलिका ! सखि, देव्या इदं शिल्पि-सकाशाद् आनीतं नाग-मुद्रा-सनाथम् अंगुलीयकं स्निग्धं निध्यायन्ती तव उपालम्भे पतिताऽस्मि ।

बकु॰ : (विलोक्य) स्थाने सज्जति दृष्टिः । अनेन अंगुलीयकेन उद्भिन्न-किरण केसरेण कुसुमित इव ते अग्रहस्तः प्रतिभाति ।

कौमु॰ : हला सखि, कुत्र प्रस्थिताऽसि ?

बकु॰ : देव्या एव वचनेन नाट्याचार्यम् आर्य-गणदासं प्रष्टुम् ''उपदेश-ग्रहणे कीदृशी मालविका ?'' इति ।

कौमु॰ : सखि ईदृशेन व्यापारेण असंनिहिताऽपि सा कथं भर्त्रा दृष्टा ।

बकु॰ : स जनो देव्याः पार्श्व-गतः चित्रे दृष्टः ।

कौमु॰ : कथम् इव ?

बकु॰ : शृणु । चित्रशालां गता देवी यदा प्रत्यग्र-वर्ण-रागां चित्रलेखाम् आचार्यस्य आलोकयन्ती तिष्ठति, तदा भर्ता उपस्थितः ।

कौमु॰ : ततः ततः ?

बकु॰ : उपचारानन्तरम् एकासनोपविष्टेन भर्त्रा चित्रगतायाः देव्याः परिजन-मध्य-गताम् आसन्न-दारिकां दृष्ट्वा देवी पृष्टा ।

कौमु॰ : किम् इति ?

बकु॰ : अपूर्वा इयं दारिका देव्या आसन्ना आलिखिता किं नामधेया इति ।

कौमु॰ : आकृति-विशेषेषु आदरः पदं करोति । ततः ततः ?

बकु॰ : ततोऽवधीरित-वचनो भर्ता शंकितो देवीं पुनः अपि अनुबन्द्धुं प्रवृत्तः । ततः कुमार्या वसुलक्ष्म्या आख्यातम् ''आर्य एषा मालविका ।'' इति।

कौमु॰ : (सस्मितम्) सदृशं खलु बालभावस्य । अतोऽपरं कथय ।

बकु॰ : किमन्यत् ? साम्प्रतं मालविका सविशेषं भर्तुः दर्शन-पथाद् रक्ष्यते।

कौमु॰ : हला सखि, अनुतिष्ठ आत्मनो नियोगम् । अहम् अपि एतद् अंगुलीयकं देव्यै उपनेष्यामि । (निष्क्रान्ता)

बकु॰ : (परिक्रम्य, अवलोक्य) एष नाट्याचार्यः संगीत-शालातो निर्गच्छति। यावद् अस्मै आत्मानं दर्शयामि । (इति परिक्रामति)

**( प्रविश्य )**

गण॰ : कामं खलु सर्वस्य अपि कुल-विद्या बहुमता । न पुनः अस्माकं नाट्यं प्रति मिथ्या गौरवम् ।

बकु॰ : (उपेत्य) आर्य, वन्दे ।

गण॰ : भद्रे, चिरं जीव ।

बकु॰ : आर्य, देवी पृच्छति, ''अपि उपदेश-ग्रहणे न अतिक्लिश्नाति वः शिष्या मालविका ?'' इति ।

गण॰ : भद्रे विज्ञाप्यतां देवी परम-निपुणा मेधाविनी चेति । किं बहुना यद् यत्-प्रयोग-विषये भाविकम् उपदिश्यते मया तस्यै ।
तत्-तद्-विशेष-करणात् प्रत्युपदिशतीव मे बाला ॥2॥

बकु॰ : (आत्मगतम्) अतिक्रामन्तीम् इव इरावतीं पश्यामि । (प्रकाशम्) कृतार्था इदानीं वः शिष्या यस्या गुरुजनः एव तुष्यति ।

गण॰ : तद्विधानाम् असुलभत्वात् पृच्छामि कुतो देव्याः तत् पात्रम् आनीतम् ?

बकु॰ : अस्ति देव्या वर्णावरो भ्राता वीरसेनो नाम । स भर्त्रा नर्मदातीरे अन्तपाल-दुर्गे स्थापितः । तेन शिल्पाधिकारे योग्या इयं दारिका इति भणित्वा भगिन्या देव्या उपायनं प्रेषिता ।

गण॰ : (आत्मगतम्) आकृति-विशेष-प्रत्ययाद् एनाम् अनून-वस्तुकां संभावयामि। (प्रकाशम्) भद्रे, मयापि यशस्विना भवितव्यम् यतः—
पात्र-विशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्र-शुक्तौ मुक्ताफलतां पयोदस्य ॥3॥

बकु॰ : आर्य, कुत्र इदानीं वः शिष्या ?

गण॰ : इदानीमेव पञ्चांगाभिनयम् उपदिश्य मया विश्रम्यताम् इति अभिहिता दीर्घिकावलोकन-गवाक्षगता प्रवातम् आसेवमाना तिष्ठति ।

बकु॰ : तेन हि पुनः अनुजानातु माम् आर्यः । यावद् अस्याः आर्यस्य परितोष-निवेदनेन उत्साहं वर्धयामि ।

गण॰ : दृश्यतां सखी । अहम् अपि लब्ध-क्षणः स्व-गृहं गच्छामि।

**( निष्क्रान्तौ )**

(ततः प्रविशति एकान्त-स्थित-परिजनो मन्त्रिणा लेख-हस्तेन अन्वास्यमानो राजा ।

राजा : (अनुवाचित-लेखम् अमात्यं विलोक्य) वाहतक, किं प्रतिपद्यते वैदर्भः ?

अमा॰ : देव, आत्मविनाशम् ।

राजा : संदेशम् इदानीं श्रोतुम् इच्छामि ।

अमा॰ : इदम् इदानीम् अनेन प्रतिलिखितम्—

पूज्येन अहम् आदिष्टः— ''भवतः पितृव्यपुत्रः कुमारो माधवसेनः प्रतिश्रुत-संबन्धो मम उपान्तिकम् उपसर्पन् अन्तरा त्वदीयेन अन्तपालेन अवस्कन्द्य गृहीतः । स त्वया मदपेक्षया सकलत्रसोदर्यो मोक्तव्यः'' इति । एतत् ननु वो विदितं यत् तुल्याभिजनेषु राज्ञां वृत्तिः । अतोऽत्र मध्यस्थः पूज्यो भवितुम् अर्हति । सोदरा पुनः अस्य ग्रहण-विप्लवे विनष्टा । तदन्वेषणाय प्रयतिष्ये । अथवा अवश्यम् एव माधवसेनो मया पूज्येन मोचयितव्यः । श्रूयताम् अभिसंधि :—

मौर्य-सचिवं विमुञ्चति यदि पूज्यः संयतं मम श्यालम् ।
मोक्ता माधवसेनस्ततो मया बन्धानात् सद्यः ॥4॥ इति ।

राजा : (सरोषम्) कथं कार्य-विनिमयेन मयि व्यवहरति अनात्मज्ञः ? वाहतकः, प्रकृति-शत्रुः प्रतिकूलकारी च मे वैदर्भः । तद् यातव्यपक्षे स्थितस्य पूर्व-संकल्पित-समुन्मूलनाय वीरसेनमुखं दण्डचक्रम् आज्ञापय ।

अमा॰ : यद् आज्ञापयति देवः. ।

राजा : अथवा किं भवान् मन्यते ?

अमा॰ : शास्त्र-दृष्टम् आह देवः ।

अचिराधिष्ठित-राज्यः शत्रुः प्रकृतिष्वरूढ-मूलत्वात् ।

नव-संरोपण-शिथिलस्तरुरिव सुकरः समुद्धर्तुम् ॥5॥

राजा : तेन हि अवितथम् तन्त्रकार-वचनम्। इदमेव वचनं निमित्तम् उपादाय समुद्योज्यतां सेनाधिपतिः ।

अमा० : तथा (निष्क्रान्तः)

(परिजनो यथा-व्यापारम् राजानम् अभितः स्थितः ।)

**( प्रविश्य )**

विदू० : आज्ञप्तोऽस्मि तत्रभवता राज्ञा—"गौतम, चिन्तय तावद् उपायम् । यथा मे यदृच्छा-दृष्ट-प्रतिकृतिः मालविका प्रत्यक्ष-दर्शना भवति" इति। मया च तत् तथा कृतम् । तावद् अस्मै निवेदयामि । (परिक्रामति)

राजा : (विदूषकं दृष्ट्वा) अयम् अपरः कार्यान्तर-सचिवः अस्माकम् उपस्थितः।

विदू० : (उपगम्य) वर्धतां भवान् ।

राजा : (सशिरः कम्पम्) इत आस्यताम् । (विदूषकः उपविष्टः) अपि उपाय-दर्शने व्यापृतं ते प्रज्ञाचक्षुः ?

विदू० : प्रयोग-सिद्धिं पृच्छ ।

राजा : कथमिव ?

विदू० : (कर्णे) एवमिव ।

राजा : साधु, वयस्य, निपुणम् उपक्रान्तम् । इदानीं दुरधिगम-सिद्धौ अपि अस्मिन् आरम्भे वयम् आशंसामहे। कुतः —

अर्थं सप्रतिबन्धं प्रभुरधिगन्तुं सहायवानेव ।
दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि ॥6॥

**( नेपथ्ये )**

अलं बहु विकत्थ्य । राज्ञः समक्षमेव आवयोः अधरोत्तरयोः व्यक्तिः भविष्यति ।

राजा : (आकर्ण्य) सखे, त्वत्-सुनीति-पादपस्य पुष्पम् उद्भिन्नम् ।

विदू० : फलम् अपि अचिरेण द्रक्ष्यसि ।

(ततः प्रविशति कञ्चुकी)

कञ्चु॰ : देव, देव, अमात्यो विज्ञापयति अनुष्ठिता प्रभोः आज्ञा । एतौ पुनः हरदत्तगणदासौ—
उभावभिनयाचार्यौ परस्पर-जयैषिणौ ।
त्वां द्रष्टुम् उद्यतौ साक्षाद् भावाविव शरीरिणौ ॥7॥

राजा : प्रवेशय तौ ।

कञ्चु॰ : यद् आज्ञापयति देवः । (निष्क्रम्य ताभ्यां सह प्रविश्य) इत इतो भवन्तौ ।

गण॰ : (राजानं विलोक्य) अहो दुरासदो राज-महिमा ।
न च न परिचितो चाप्यरम्यः,
चकितमुपैमि तथापि पार्श्वमस्य ।
सलिलनिधिरिव प्रतिक्षणं मे
भवति स एव नवो नवोऽयमक्ष्णोः ॥8॥

हर॰ : महत् खलु पुरुषाकारम् इदं ज्योतिः ।

कञ्चु॰ : एष देवः । उपसर्पतां भवन्तौ ।

उभौ : (उपेत्य) विजयतां देवः ।

राजा : स्वागतं भवद्भ्याम् । (परिजनं विलोक्य) आसने तावद् अत्रभवतोः । (उभौ परिजनोपनीतयोः आसनयोः उपविष्टौ ।)

राजा : किमिदं शिष्योपदेशकाले युगपद् आचार्याभ्याम् अत्र उपस्थानम् ?

गण॰ : देव, श्रूयताम् । मया सुतीर्थाद् अभिनय-विद्या सुशिक्षिता । दत्तप्रयोगः चास्मि । देवेन देव्या च परिगृहीतः ।

राजा : बाढं जाने । ततः किम् ?

गण॰ : सोऽहममुना हरदत्तेन प्रधान-पुरुष-समक्षम् "अयं मे न पादरजसापि तुल्यः" इति अधिक्षिप्तः ।

हर॰ : देव, अयमेव प्रथमं परिवादकरः—"अत्रभवतः किल मम च समुद्र-पल्वलयोः इव अन्तरम्" इति । तत् अत्रभवान् इमं मां च शास्त्रे प्रयोगे च विमृशतु । देव एव नौ विशेषज्ञः प्राश्निकः ।

विदू॰ : समर्थं प्रतिज्ञातम् ।

गण॰ : प्रथमः कल्पः । अवहितो देवः श्रोतुम् अर्हति ।

राजा : तिष्ठ तावत् ! पक्षपातम् अत्र देवी मन्यते । तद् अस्याः पण्डितकौशिकी-सहितायाः समक्षम् एव न्याय्यो व्यवहारः ।

| | | |
|---|---|---|
| विदू॰ | : | सुष्ठु भवान् भणति । |
| आचार्यौ | : | यद् देवाय रोचते । |
| राजा | : | मौद्गल्य, अमुं प्रस्तावं निवेद्य पण्डितकौशिक्या सार्धम् आहूयतां देवी। |
| कञ्चु॰ | : | यद् आज्ञापयति देवः । (इति निष्क्रम्य परिव्राजिकया देव्या च सह प्रविश्य) इत इतो भवती । |
| धारि॰ | : | (परिव्राजिकां विलोक्य) भगवति, हरदत्तस्य गणदासस्य च संरम्भे कथं पश्यसि ? |
| परि॰ | : | अलं स्वपक्षावसाद-शंकया । न परिहीयते प्रतिवादिनो गणदासः । |
| धारि॰ | : | यद्यपि एवं तथापि राज-परिग्रहः प्रधानत्वम् उपहरति । |
| परि॰ | : | अयि, राज्ञी-शब्द भाजनम् आत्मानम् अपि चिन्तयतु भवती । |
| विदू॰ | : | अयि, उपस्थिता देवी पीठमर्दिकां पण्डितकौशिकीं पुरस्कृत्य तत्रभवती धारिणी । |
| राजा | : | पश्यामि एनाम् । या एषा—<br>मङ्गलालंकृता भाति कौशिक्या यतिवेषया ।<br>त्रयी विग्रहवत्येव समम् अध्यात्मविद्यया ॥9॥ |
| परि॰ | : | (उपेत्य) विजयतां देवः । |
| राजा | : | भगवति, अभिवादये । |
| परि॰ | : | महासार-प्रसवयोः सदृशक्षमयोर् द्वयोः ।<br>धारिणीभूत-धारिण्योर् भव भर्ता शरच्छतम् ॥10॥ |
| धारि॰ | : | जयतु जयतु आर्यपुत्रः । |
| राजा | : | स्वागतं देव्यै । (परिव्राजिकां विलोक्य) भगवति, क्रियताम् आसन-परिग्रहं (सर्वे उपविशन्ति) |
| राजा | : | भगवति, अत्र भवतोः हरदत्तगणदासयोः परस्परं विज्ञानसंघर्षिणोः भगवत्या प्राश्निक-पदम् अध्यासितव्यम् । |
| परि॰ | : | (सस्मितम्) अलम् उपालम्भेन । पत्तने सति ग्रामे रत्न-परीक्षा ? |
| राजा | : | न एतद् एवम् । पण्डितकौशिकी खलु भगवती । पक्षपातिनौ पुनः अहं देवी च । |
| आचार्यौ | : | सम्यग् आह देवः । मध्यस्था भगवती नौ गुण-दोषतः परिच्छेत्तुम् अर्हति । |

राजा : तेन हि प्रस्तूयतां विवादः ।

परि॰ : देव, प्रयोग-प्रधानं हि नाट्यशास्त्रम् । किमत्र वाग् व्यवहारेण ? कथं वा देवी मन्यते ।

देवी : यदि मां पृच्छसि, तदा एतयोः विवादः एव न मे रोचते ।

गण॰ : देवि, न मां समानविद्यतः परिभवनीयम् अवगन्तुम् अर्हसि ।

विदू॰ : भवति, पश्याम उदरम्भरिसंवादम् । किं मुधा वेतन-दानेन एतेषाम् ?

देवी : ननु कलहप्रियोऽसि ।

विदू॰ : मैवम् अन्योन्य-कलह-प्रिययोः मत्त-हस्तिनोः एकतरस्मिन् अनिर्जिते कुत उपशमः ?

राजा : ननु स्वाङ्गसौष्ठवातिशयम् उभयोः दृष्टवती भगवती ।

परि॰ : अथ किम् ?

राजा : तद् इदानीम् अतः परं किम् आभ्यां प्रत्यापयितव्यम् ।

परि॰ : तदेव वक्तुकामास्मि ।

शिलष्टा क्रिया कस्यचिदात्मसंस्था,
संक्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव ॥11॥

विदू॰ : श्रुतम् आर्याभ्यां भगवत्या वचनम् ? एष पिण्डितार्थोपदेश-दर्शनात् निर्णय इति ।

हर॰ : परम् अभिमतं नः ।

गण॰ : देवि, एवं स्थितम् ।

देवी॰ : यदा पुनः मन्द-मेधा शिष्या उपदेशं मलिनयन्ति तथा आचार्यस्य न दोषः।

राजा : देवि, एवम् आपद्यते—"विनेतुः अद्रव्य-परिग्रहोऽपि बुद्धिलाघवं प्रकाशयति" इति।

देवी : (आत्मगतम्) अलम् आर्यपुत्रस्य उत्साह-कारणं मनोरथं पूरयित्वा। (प्रकाशम्, गणदासं प्रति) विरम निरर्थकाद् आरम्भात् ।

विदू॰ : सुष्ठु भवती भणति । भो गणदास, संगीतपदं लब्ध्वा सरस्वत्या उपायन-मोदकान् खादतः किं ते मुख-निग्रहेण विवादेन ?

गण॰ : सत्यम् , अयमेव अर्थो देवी-वाक्यस्य श्रूयताम् अवसर-प्राप्तम् इदानीम्—

लब्धास्पदोऽस्मीति विवादभीरोः
तितिक्षमाणस्य परेण निन्दाम् ।
यस्यागमः केवल-जीविकायै
तं ज्ञान-पण्यं वणिजं वदन्ति ॥12॥

देवी : अचिरोपनीता ते शिष्या । अपरिनिष्ठितस्य उपदेशस्य पुनः अन्याय्यं प्रकाशनम् ।

गण॰ : अत एव मे निर्बन्धः ।

देवी : तेन हि द्वौ अपि भगवत्यै उपदेशं दर्शयतम् ।

परि॰ : देवि, नैतत न्याय्यम् । सर्वज्ञस्य अपि एकाकिनो निर्णयाभ्युपगमो दोषाय।

देवी : (स्वगतम्) मूढे परिव्राजिके, मा जाग्रतीमपि सुप्ताम् इव करोषि (सासूयं परावर्तते, राजा देवीं परिव्राजिकायै दर्शयति)।

परि॰ : अनिमित्तम् इन्दु-वदने किम् अत्र
भवतः पराङ्मुखीभवसि ?
प्रभवन्त्योऽपि हि भर्तृषु
कारण-कोपाः कुटुम्बिन्यः ॥13॥

विदू॰ : ननु सकारणम् एव । आत्मनः पक्षो रक्षितव्यः ।
(गणदासं विलोक्य) दिष्ट्या कोप-व्याजेन देव्या परित्रातो भवान्।
सुशिक्षितोऽपि सर्व उपदेश-दर्शनेन निष्णातो भवति ।

गण॰ : देवि श्रूयताम् । एवं जनो गृहणाति । तद् इदानीम्—
विवादे दर्शयिष्यामि क्रिया-संक्रान्तिमात्मनः ।
यदि मां नानुजानासि परित्यक्तोऽस्म्यहं त्वया ॥14॥
(इति आसनाद् उत्थातुम् इच्छति)

देवी : (स्वगतम्) का गतिः ? (प्रकाशम्) प्रभवति आचार्य शिष्यजनस्य।

गण॰ : चिरम् उपदेश-शंकितोऽस्मि । (राजानम् अवलोक्य) अनुज्ञातं देव्या। तद् आज्ञापयतु देवः, कस्मिन् अभिनय-वस्तुनि प्रयोगं दर्शयिष्यामि।

| | | |
|---|---|---|
| राजा | : | यद् आदिशति भगवती । |
| परि॰ | : | किमपि देव्या मनसि वर्तते । ततः शंकितास्मि । |
| देवी | : | भण विस्रब्धम् । प्रभवति प्रभुः आत्मनः परिजनस्य । |
| राजा | : | मम चेति ब्रूहि । |
| देवी | : | भगवति, भण इदानीम् । |
| परि॰ | : | देव, शर्मिष्ठायाः कृतिं चतुष्पदोत्त्थम् छलिकं दुष्प्रयोज्यम् उदाहरन्ति। तत्र एकार्थ-संश्रयम् उभयोः प्रयोगं पश्यामः । तावता ज्ञायत एव अत्र-भवतोः उपदेशान्तरम्। |
| आचार्यौ | : | यद् आज्ञापयति भगवती । |
| विदू॰ | : | तेन हि द्वौ अपि वर्गौ प्रेक्षागृहे संगीत-रचनां कृत्वा तत्रभवतो दूतम् प्रेषयताम् । अथवा मृदंगशब्द एव नः उत्त्थापयिष्यति । |
| हर॰ | : | तथा । (इति उत्तिष्ठति । गणदासः धारिणीम् अवलोकयति) |
| देवी | : | (गणदासं विलोक्य) विजयी भवतु । ननु विजयाभ्यर्थिनी अहम् आचार्यस्य । (आचार्यौ प्रस्थितौ) |
| परि॰ | : | इतः तावद् आचार्यौ । |
| आचार्यौ | : | (परिवृत्य) इमौ स्वः । |
| परि॰ | : | निर्णयाधिकारे ब्रवीमि । सर्वांग-सौष्ठवाभिव्यक्तये विगत-नेपथ्ययोः पात्रयोः प्रवेशोऽस्तु । |
| आचार्यौ | : | न इदम् आवयोः उपदेश्यम् । (निष्क्रान्तौ) |
| देवी | : | (राजानम् अवलोक्य) यदि राज-कार्येषु ईदृशी उपाय-निपुणता आर्यपुत्रस्य, ततः शोभनं भवेत् । |
| राजा | : | अलमन्यथा गृहीत्वा<br>न खलु मनस्विनि, मया प्रयुक्तमिदम् ।<br>प्रायः समानविद्याः<br>परस्पर-यशः पुरोभागाः ॥15॥<br>(नेपथ्ये मृदंगध्वनिः)<br>(सर्वे कर्णं ददति) |
| परि॰ | : | हन्त ! प्रवृत्तं संगीतम् ।<br>(सर्वे उत्तिष्ठन्ति) |

विदू : (अपवार्य) भो: धीरं गच्छ । तत्रभवती धारिणी विसंवादयिष्यति । (निष्क्रान्ता: सर्वे)

**इति प्रथमोअंक:**

विशेष : यह नाटकांश कालिदास के नाटक मालविकाग्निमित्र के प्रथम अंक का संक्षिप्त रूप है।

## शब्दार्थ

उद्भिन्न = निकली हुई

प्रत्यग्र-वर्ण-रागाम् = गीले रंगों वाली (चित्रलेखा) को

अनून-वस्तुकाम् = निर्दोष रचना को

दीर्घिका = बावड़ी

प्रवातम् आसेवामाना = वायु का सेवन करती हुई

अनुवाचित = पढ़वाये हुए

अवस्कन्द्य = घेरा डाल कर

सकलत्र-सोदर्य: = पत्नी और बहिन सहित

समुन्मूलनाय = जड़ से उखाड़ने के लिए

संरोपण = बोना

अवितथम् = सत्य

तन्त्रकार = तन्त्र-लेखक

व्यापृत = व्यस्त

सप्रतिबन्धम् = रुकावट भरे (कार्य को)

दुरासद = अगम्य

अधिक्षिप्त: = आक्षेप किया हुआ, अपमानित

परिच्छेतुम् = निर्णय करने के लिए

उदरंभरि संवाद = पेट भरने वालों को संवाद

तितिक्षमाणस्य = सहन करते हुए का

ज्ञान-पण्य = ज्ञान का व्यापार करने वाला

अपदेश-शंकित = बुराई से शंकित

विगत-नेपथ्य = शृंगार-सज्जा से रहित

विसंवादयिष्यति = बुरा-भला कहेगी

## अभ्यास

1. (क) मालविकाग्निमित्र नाटक के प्रथम अंक की कथा का सार लिखो।

   (ख) किन्हीं दो पर टिप्पणी लिखो—

   प्रस्तावना । नान्दी । सूत्रधार । विदूषक । अंक ।

   (ग) निम्नलिखित पात्रों का चरित्र-चित्रण करो—

   मालविका, अग्निमित्र, धारिणी, परिव्राजिका ।

(घ) कवि कालिदास ने इस नाटक का नाम ''मालविकाग्निमित्र'' क्यों रखा?

2. संस्कृते उत्तरं लिखत—

(क) श्रेष्ठस्य अध्यापकस्य गुणान् वर्णय ।

(ख) हरदत्त-गणदासयो: कलहस्य किं कारणम् आसीत् ?

(ग) गणदासस्य शिष्या का आसीत्?

3. **नीचे दिए गए शब्दों से रिक्त स्थान की पूर्ति करो-**

(मन्यते, मालविका, कौमुदिका, लब्धक्षण:, संगीतशालां)

(क) तत् तावत्-----गच्छामि।

(ख) पक्षपातं अत्र देवी-----।

(ग) अहम् अपि-----स्वगृहम् गच्छामि।

(घ) उपदेश-ग्रहणे कीदृशी--------।

4. **यथानिर्दिष्ट परिवर्तन करो**

(क) अहम् संगीतशालां गच्छामि। (मध्यम पु. में)

(ख) सन्देशं श्रोतुम् **इच्छामि** (विधि लिङ् में) ।

(ग) अस्मै आत्मानं **दर्शयामि** (लोट् में) ।

## परिशिष्ट

### नाटक

रूपक के दस भेदों (प्रकरण, भाण, प्रसहन आदि) में नाटक भी एक भेद है। इसकी कथा प्रसिद्ध होनी चाहिए। इसका नायक धीरोदात्त या धीर ललित आदि होना चाहिए। इसमें वीर या शृंगार में से कोई प्रधान रस होना चाहिए तथा अन्य रसों का भी प्रयोग होना चाहिए। कथा पांच से लेकर दस अंकों में विभक्त होनी चाहिए। इसका नामकरण नायक, नायिका अथवा दोनों के नाम पर भी हो सकता है।

### नान्दी

किसी देवता, ब्राह्मण अथवा राजा आदि की स्तुति में कहे गए आशीर्वादात्मक वचन को नान्दी कहते हैं। यह देवताओं को आनन्दित करती है, इसलिए इसे नान्दी कहा जाता है।

## प्रस्तावना

सूत्रधार के साथ नटी, नट, विदूषक, पारिपार्श्विक आदि पात्र प्रस्तावना में आते हैं और वार्तालाप द्वारा नाटक के विषय की सूचना देते हैं।

## नेपथ्य

नेपथ्य का मूल अर्थ 'प्रसाधन' या 'शृंगार-सज्जा' है। रंगमंच पर पर्दे के पीछे उस स्थान को भी नेपथ्य कह दिया जाता है, जहां नट या अभिनेता नेपथ्य (प्रसाधन) अर्थात् अभिनय के योग्य वेष-भूषा धारण करते हैं। नेपथ्य शब्द जवनिका या पर्दे के लिए भी आता है।

## अंक

नाटक की कथा मुख्य घटनाओं के आधार पर जिन भागों में विभाजित की जाती है, उन्हें अंक कहते हैं।

## विदूषक

यह राजा का मित्र होता था। यह उसके प्रेम कार्यों में सहायक होता था एवं परिहास-प्रिय होता था।

## कञ्चुकी

इसे 'काञ्चुकीय' भी कहते हैं। यह अन्तःपुर के प्रधान सेवकों में से एक होता था लम्बा चोगा (कञ्चुक) धारण करने के कारण इसे काञ्चुकीय कहा जाता था। यह वृद्ध, ब्राह्मण, गुणी और विश्वासपात्र होता था।

# व्याकरण भाग

## सन्धि

शब्दांश अथवा शब्दों का बिना रुके उच्चारण करते समय, दो वर्णों के परस्पर मेल से उनमें कुछ परिवर्तन हो जाता है। उसे सन्धि कहते हैं। यह तीन प्रकार की है—

1. स्वर-सन्धि (अच्-सन्धि) = जब स्वर के साथ स्वर का मेल हो।

   यथा—विद्या + आलयः = विद्यालयः । नै + अकः = नायकः ।

2. व्यंजन-सन्धि (हल्-सन्धि)—जब पूर्व में स्थित व्यंजन का मेल परवर्ती स्वर या व्यंजन के साथ हो। परिवर्तन केवल व्यंजन में होता है।

   यथा—जगत् + ईशः = जगदीशः । तत् + लयः = तल्लयः ।

3. विसर्ग-सन्धि—जब पूर्ववर्ती विसर्ग का मेल परवर्ती स्वर या व्यंजन के साथ हो। यथा—देवः + अवदत् = देवोऽवदत् । नमः + ते = नमस्ते ।

निम्नलिखित स्थितियों में सन्धि अनिवार्य है —

(क) एक पद में । यथा—भो + अति = भवति ।

(ख) उपसर्ग तथा धातु में । यथा—अनु + असरत् = अन्वसरत् ।

(ग) समास में । यथा—देव + आलय = देवालय ।

(घ) पद्य में । यथा—इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ।

वाक्य में दो शब्दों में होने वाली सन्धि वक्ता वा लेखक की इच्छा पर निर्भर है। उदाहरणार्थ—अधुना एव आगच्छ, अथवा अधुनैवागच्छ । यह वाक्य दोनों प्रकार से शुद्ध हैं।

## स्वर सन्धि

### 1. दीर्घ-विधि

(क) अ या अ + अ या आ = (दोनों मिलकर एक) आ ।

(ख) इ या ई + इ या ई = (दोनों मिलकर एक) ई ।

(ग) उ या ऊ + उ या ऊ = (दोनों मिलकर एक) ऊ ।

(घ) ऋ या ॠ + ऋ या ॠ = (दोनों मिलकर एक) ॠ ।

**उदाहरण—**

(क) क्व + अपि = क्वापि । कदा + अपि = कदापि ।

शिव + आलयः = शिवालयः । सेवा + आश्रमः = सेवाश्रमः ।

(ख) कवि + इन्द्रः = कवीन्द्रः । मुनि + ईशः = मुनीशः ।

नदी + इयम् = नदीयम् । रजनी + ईशः = रजनीशः ।

(ग) गुरु + उपदेशः = गुरूपदेशः । सिन्धु + ऊर्मिः = सिन्धूर्मिः ।

वधू + उत्तरम् = वधूत्तरम् । भू + ऊर्ध्वम् = भूर्ध्वम् ।

(घ) पितृ + ऋणम् = पितृणम् । मातृ + ऋणम् = मातृणम् ।

विकल्प से पितृणम् ) । विकल्प से मातृणम्) ।

### 2. गुण-विधि

(क) अ या आ + इ या ई (दोनों मिलकर) ए ।

(ख) अ या आ + उ या ऊ (दोनों मिलकर) ओ ।

(ग) अ या आ + ऋ या ॠ (दोनों मिलकर) अर् ।

**उदाहरण—**

(क) देव + इच्छा = देवेच्छा । यथा + इष्टम् = यथेष्टम् ।

सुर + ईशः = सुरेशः । राका + ईशः = राकेशः ।

(ख) बाल + उपदेशः = बालोपदेशः । महा + उत्सवः = महोत्सवः ।

गंगा + ऊर्मि = गंगोर्मि ।

सूर्य + ऊर्जा = सूर्योर्जा ।

(ग) राज + ऋषिः = राजर्षिः । वर्षा + ऋतुः = वर्षर्तुः ।

महा + ऋषिः = महर्षिः । ग्रीष्म + ऋतुः = ग्रीष्मर्तुः ।

**3. वृद्धि-विधि**

(क) अ या आ + ए या ऐ = (दोनों मिलकर) ऐ
(ख) अ या आ + ओ या औ = (दोनों मिलकर) औ ।

**उदाहरण—**

(क) तत्र + एकः = तत्रैकः । तथा + एव = तथैव ।
मत + ऐक्य = मतैक्य । महा + ऐश्वर्य = महैश्वर्य ।
(ख) तण्डुल + औदनम् = तण्डुलौदनम् । गंगा + ओघः = गंगौघः
महा + औषधः = महौषधः ।
देव + औदार्य = देवौदार्य ।

**4. यण्-विधि**

(क) इ या ई + कोई भिन्न स्वर = पूर्व स्वर को य् ।
(ख) उ या ऊ + कोई भिन्न स्वर = पूर्व स्वर को व् ।
(ग) ऋ या ॠ + कोई भिन्न स्वर = पूर्व स्वर को र् ।

**उदाहरण —**

(क) अति + अन्तः = अत्यन्तः । देवी + आज्ञा = देव्याज्ञा ।
प्रति + उत्तरम् = प्रत्युत्तरम् । प्रति + एकः = प्रत्येकः ।
(ख) सु + आगतम् = स्वागतम् । गुरु + आज्ञा = गुर्वाज्ञा ।
भू + आदिः = भ्वादिः । वधू + इच्छा = वध्विच्छा ।
(ग) मातृ + अर्चन = मात्रर्चन । पितृ + आदेशः = पित्रादेशः ।
(घ) भ्रातृ + इच्छा = भ्रात्रिच्छा । मातृ + आज्ञा = मात्राज्ञा ।

**5. अयादि-विधि**

(क) ए + कोई स्वर = पूर्व स्वर को अय् ।
(ख) ऐ + कोई स्वर = पूर्व स्वर को आय् ।
(ग) ओ + कोई स्वर = पूर्व स्वर को अव् ।
(घ) औ + कोई स्वर = पूर्व स्वर को आव् ।

**उदाहरण —**

(क) ने + अति = नयति । कवे + ए = कवये ।

(ख) गै + अक: = गायक: ।
(ग) भो + अति = भवति ।
(घ) द्वौ + अपि = द्वावपि ।

नै + अक: = नायक: ।
गो + एषणा = गवेषणा ।
पौ + अक: = पावक: ।

**6. पूर्वरूप-विधि**

(क) पदान्त ए + अ = (दोनों मिल कर) ए ।
(ख) पदान्त ओ + अ = (दोनों मिल कर) ओ ।

**विशेष—** अ के पूर्व रूप हो जाने का सूचक चिन्ह 'ऽ' है, जो ए अथवा ओ के अनन्तर लगा दिया जाता है।

**उदाहरण—**

(क) ग्रामे + अपि = ग्रामेऽपि । लोके + अस्मिन् = लोकेऽस्मिन् ।
(ख) लोको + अयम् = लोकोऽयम् प्रभो + अत्र = प्रभोऽत्र

**7. पररूप-विधि**

(क) अ अन्त वाला उपसर्ग + ए से आरम्भ होने वाली धातु = (दोनों मिलकर) ए।
(ख) अ अन्त वाला उपसर्ग + ओ से आरम्भ होने वाली धातु = (दोनों मिलकर) ओ।

**उदाहरण—**

(क) प्र + एजते = प्रेजते ।
(ख) उप + ओषति = उपोषति ।

**8. प्रकृतिभाव**

(क) द्विवचनान्त ई + कोई स्वर = कोई परिवर्तन नहीं ।
(ख) द्विवचनान्त ऊ + कोई स्वर = कोई परिवर्तन नहीं ।
(ग) द्विवचनान्त ए + कोई स्वर = कोई परिवर्तन नहीं ।

**विशेष —** परिवर्तन न होने की स्थिति को प्रकृतिभाव कहते हैं।

**उदाहरण—**

(क) कवी + इमौ = कवी इमौ । हरी + एतौ = हरी एतौ ।
(ख) विष्णू + इमौ = विष्णू इमौ । साधू + अत्र = साधू अत्र ।

(ग) लते + एते = लते एते । सेवेते + इमौ = सेवेते इमौ ।

**विशेष—** इन उदाहरणों में दीर्घ, यण् अयादि आदि सन्धि हो सकती थी, परन्तु इस नियम के अनुसार कोई परिवर्तन नहीं हुआ । अतः यहाँ प्रकृतिभाव है।

## व्यंजन-सन्धि

### 1. श्चुत्व-विधि

स्, तवर्ग के बाद श् , चवर्ग—स् को श् तथा तवर्ग को चवर्ग ।

**उदाहरण—**

रामस् + शोभते = रामश्शोभते — पुनस् + च = पुनश्च

सत् + चरित्र = सच्चरित्र — तत् + छत्रम् = तच्छत्रम्

सद् + जन = सज्जन — शत्रून् + जयति = शत्रूञ्जयति

### 2. ष्टुत्व-विधि—

स् तवर्ग के बाद ष् या टवर्ग = स् को ष् तथा तवर्ग को टवर्ग ।

**उदाहरण—**

बालस + षष्ठः = बालष्षष्ठः — रामस् + टीकते = रामष्टीकते

तत् + टीका = तट्टीका — मत् + डमरु = मड्डमरु

दुष् + तः = दुष्टः — कृष् + नः = कृष्णः

### 3. छत्व-विधि—

पूर्ववर्ती शब्द का अन्तिम च् + श् = श् को छ् ।

**उदाहरण—**

मृत् > मृच् + शकटिक = मृच्छकटिक ।

बृहत् > बृहच् + शिला = बृहच्छिला ।

तत् > तच् + श्रुत्वा = तच्छ्रुत्वा ।

**विशेष—** इन उदाहरणों में पहले श्चुत्व-विधि से त् का च् हुआ है, फिर छत्व-विधि से सन्धि हुई है।

**4. लत्व-विधि**

(क) त् , व + ल् = पूर्व वर्ण को ल् ।

(ख) न् + ल् = दोनों को ँल्ल् ।

**उदाहरण—**

(क) तत् + लीनः = तल्लीनः । सुहृद् + लाभः = सुहृल्लाभः ।

(ख) विद्वान् + लिखति = विद्वाँल्लिखति ।

**5. जश्-विधि**

वर्गों के प्रथम वर्ण (क्, च्, ट्, त्, प) + स्वर, वर्गों के तीसरे, चौथे वर्ण, य्, र्, ल, व्, ह् = पूर्व वर्ण को क्रमशः ग्, ज्, ड्, द्, ब् ।

**उदाहरण—**

दिक् + अम्बरः = दिगम्बरः । अच् + अन्तः = अजन्तः ।

षट् + विंशतिः = षड्विंशतिः। जगत् + गुरुः = जगद्गुरुः ।

अप् + जः = अब्जः । जयत् + रथः = जयद्रथः ।

**6. पूर्व-सवर्ण-विधि**

वर्णों के पहले, दूसरे, तीसरे, चौथे वर्ण + ह् = पूर्व वर्ण को उसी वर्ग का तीसरा वर्ण तथा ह् को विकल्प से उसी वर्ग का चौथा वर्ण ।

**उदाहरण—**

वाक् + हरि = वाग्हरि, वाग्घरि ।

तत् + हितम् = तद्हितम्, तद्धितम् ।

**7. चर्-विधि**

वर्गों के तीसरे वर्ण (ग्, ज्, ड्, द्, ब्) + वर्गों के पहले या दूसरे वर्ण (क्, ख्, च्, छ्, ट्, ठ्, त्, थ्, प्, फ्) या श्, ष्, स् = पूर्व वर्ण को क्रमशः अपने वर्ग का पहला व (क्, च्, ट्, त्, प्)

**उदाहरण—**

छेद् + ता = छेत्ता । उद् + पतति = उत्पतति ।

अद् + ति = अत्ति । उद् + साहः = उत्साहः ।

## 8. अनुनासिक-विधि

कवर्ग, चवर्ग, टवर्ग, तवर्ग, पवर्ग + [ वर्ग का पंचम वर्ण ङ्, ञ्, ण्, न्, म् ] = पूर्व वर्ण को उसके अपने वर्ग का पञ्चम वर्ण (ङ्, ञ्, ण्, न्, म्)

**उदाहरण—**

वाक् + निनादः = वाङ्निनादः या वाग्निनाद ।
षट् + मुखः = षण्मुखः या षड्मुख ।
जगत् + नाथ = जगन्नाथ या जगद्नाथ ।

**विशेष—** यह नियम वैकल्पिक है। यदि प्रत्यय का न्, म् आदि बाद में होगा तो यह नियम अनिवार्यतः लागू होगा। यथा—

वाक् + मयम् = वाङ्मयम्          तत् + मात्रम् = तन्मात्रम् ।
सम्पद् + न = सम्पन्न ।          अप् + मयम् = अम्मयम् ।

## 9. अनुस्वार-विधि

(क) पदान्त म् + कोई व्यञ्जन = म् को अनुस्वार ।

**उदाहरण—**

कार्यम् + कुरु = कार्यं कुरु ।   धर्मम् + चर = धर्मं चर ।
सत्यम् + वद् = सत्यं वद ।   पत्रम् + लिख = पत्रं लिख ।
परन्तु म् के बाद स्वर आए, तो अनुस्वार कदापि नहीं होगा। यथा—
गुरुम् + अपृच्छत् = गुरुम् अपृच्छत् ।

(ख) पदान्त म् + वर्ग का कोई व्यंजन = म् को अनुस्वार अथवा परवर्ती व्यंजन के वर्ग का पंचम वर्ण ।

**उदाहरण—**

कार्यम् + कुरु = कार्यं कुरु, कार्यङ्कुरु ।
शीघ्रम् + चलति + शीघ्रं चलति, शीघ्रञ्चलति ।
नदीम् + तरति = नदीं तरति, नदीन्तरति ।
अहम् + पठामि = अहं पठामि, अहम्पठामि ।

**10. णत्व-विधि**

(क) ऋ, र्, ष् + अपदान्त न् = न को ण् ।

(ख) ऋ, र् ष् + [स्वर, कवर्ग, पवर्ग, य्, र्, ल्, व्, ह्, अनुस्वार, न्] + अपदान्त न् = न् को ण् ।

**उदाहरण—**

(क) पितृ + नाम = पितृणाम् । पूर् + नः = पूर्णः । कृष् + नः = कृष्णः ।

(ख) नृप + एन = नृपेण । राम + अयन = रामायण ।
हर्ष + एन = हर्षेण ।

**11. षत्व-विधि**

(क) [अ, आ से भिन्न कोई स्वर य्, र्, ल्, व् ह्, कवर्ग] + [आदेश या प्रत्यय का अपदान्त स्] = [स् को ष्]

**उदाहरण—**

रामे + सु = रामेषु । हरि + सु = हरिषु ।
करो + सि = करोषि । रोदि + सि = रोदिषि ।

(ख) [अ, आ से भिन्न कोई स्वर, य्, र् ल्, व्, ह्, कवर्ग] + [न्, विसर्ग, श्, ष्, स्] + [आदेश या प्रत्यय का अपदान्त स्] = स् को ष्

**उदाहरण—**

धनुन् + सि = धनूंषि । हविष् + सु = हविष्षु ।

## विसर्ग सन्धि

**1. लोप-विधि**

(क) अ + : + कोई भिन्न स्वर = विसर्ग (:) का लोप ।

**उदाहरण—**

देवः + आगच्छति = देव आगच्छति ।

अतः + एव = अतएव ।

| | | | | |
|---|---|---|---|---|
| (ख) सः, एषः | + | कोई व्यंजन, अ से भिन्न कोई स्वर | = | विसर्ग का लोप । |

**उदाहरण—**

सः + गच्छति = स गच्छति। सः + आगतः = स आगतः ।

एषः + बालकः = एष बालकः । एषः + आर्यः = एष आर्यः ।

| | | |
|---|---|---|
| (ग) आ + : + | कोई स्वर, वर्गों के तीसरे, चौथे, पांचवें वर्ण, य्, र्, ल्, व्, ह् । | =विसर्ग का लोप |

**उदाहरण—**

नराः + इच्छन्ति = नरा इच्छन्ति । खगाः उत्पतन्ति = खगा उत्पतन्ति ।

मेघाः + गर्जन्ति = मेघा गर्जन्ति । नद्याः + जलम् = नद्या जलम् ।

(घ) स्वर + र् + र् + पूर्ववर्ती र् का लोप तथा उससे पहले के स्वर को दीर्घ ।

**उदाहरण—**

निर् + रोगः = नीरोगः । निर् + रसः = नीरसः ।

पुनर् + रमते = पुना रमते । निर् + रवः = नीरवः ।

**2. उत्व-विधि—**

(क) अ + : + अ = विसर्ग को उ (पूर्ववर्ती अ और उ मिलाकर ओ तथा ओ के बाद अ का पूर्व रूप)

**उदाहरण—**

कः + अयम् = कोऽयम् । छात्रः + अवदत् = छात्रोऽवदत् ।

सः + अवदत् = सोऽवदत् । एषः + अपि = एषोऽपि ।

(ख) अ + : + [वर्गों के तीसरे, चौथे, पाँचवें वर्ण, य्, र्, ल्, व्, ह्] = विसर्ग को उ (अ + उ = ओ।)

**उदाहरण**—

बालकः + गच्छति = बालको गच्छति। अश्वः + धावति = अश्वो धावति। मयूरः + नृत्यति = मयूरो नृत्यति। नृपः + मोदते = नृपो मोदते। रामः + यच्छति = रामो यच्छति। मेघः + वर्षति = मेघो वर्षति। लेखकः + लिखति = लेखको लिखति। कः + हसति = को हसति।

**3. रत्व-विधि**

अ, आ से भिन्न कोई स्वर + : + [कोई स्वर, वर्ग का तीसरा, चौथा, पाँचवाँ वर्ण, य्, र्, ल्, व्, ह्] = विसर्ग को र्

**उदाहरण**—

मुनिः + अवदत् + मुनिरवदत्। साधुः + आगच्छति = साधुरागच्छति।
ऋषिः + गायति = ऋषिर्गायति। गुरोः + भाषणम् = गुरोर्भाषणम्।
भानुः + याति = भानुर्याति। कविः + वदति = कविर्वदति।

**4. सत्व-विधि**

: + त्, थ्, स् = विसर्ग को स्।

**उदाहरण**—

नमः + ते = नमस्ते। कः + त्वम् = कस्त्वम्। जनाः +तिष्ठन्ति = जनास्तिष्ठन्ति। बालः + थूत्करोति = बालस्थूत्करोति। सर्पः - सरति = सर्पस्सरति। निः + सार = निस्सार।

**5. शत्व-विधि**

: + च्, छ्, श् = विसर्ग को श्।

**उदाहरण**—

चन्द्रः + चलति = चन्द्रश्चलति। कः + चित् = कश्चित्।
तरोः + छाया = तरोश्छाया। चतुरः + छात्रः = चतुरश्छात्रः।
बालः + शेते = बालश्शेते। तडागः + शोभते = तडागश्शोभते।

## सुबन्त ( नाम-पद )

संज्ञा, विशेषण और सर्वनाम के मूल रूप (प्रातिपदिक) से विभिन्न कारक संबन्धों और वचनों को व्यक्त करने के लिए कुछ विशिष्ट प्रत्यय लगते हैं। इन्हें सुप् प्रत्यय कहते हैं।

कारक क्रिया के साथ कर्ता के विभिन्न सम्बन्धों को व्यक्त करते हैं। ये कारक छः हैं : कर्त्ता, कर्म, करण, संप्रदान, अपादान और अधिकरण । संबन्ध को कारक नहीं माना जाता, क्योंकि यह संज्ञा से संबन्धित होता है, क्रिया से नहीं। उक्त विभिन्न संबंधों को बताने के लिए प्रातिपदिक को कई रूप दिए जाते हैं। इन रूपों को उक्त छः कारकों एवं सम्बन्ध के आधार पर सात वर्गों में विभक्त किया जाता है। इन्हें विभक्ति कहते हैं। इन सात विभक्तियों के अतिरिक्त संबोधन को भी एक विभक्ति माना जा सकता है, यद्यपि शास्त्रीय दृष्टि से यह प्रथमा विभक्ति का ही एक भेद है।

संस्कृत में तीन वचन होते हैं। एक पदार्थ बताने के लिए एकवचन, दो के लिए द्विवचन और तीन या तीन से अधिक पदार्थ बताने के लिए बहुवचन का रूप दिया जाता है।

संस्कृत में तीन लिंग होते हैं : पुंलिग, स्त्रीलिंग और नपुंसकलिंग। कुछ नामपद पुंलिग में, कुछ स्त्रीलिग में और कुछ नपुंसकलिग में होते हैं।

अन्त में आने वाले वर्ण के आधार पर प्रातिपदिक के मुख्यतः दो भेद हैं :(1) अजन्त अथवा स्वरान्त (जैसे देव, लता, हरि आदि) और (2) हलन्त अथवा व्यञ्जनान्त (जैसे राजन्, सरित्, महत् आदि) । विभिन्न विभक्तियों में इनकी रूप रचना में थोड़ा बहुत अन्तर होता है।

विभिन्न विभक्तियों के नाम और उनके साधारण अर्थ निम्नलिखित हैं —

| | | |
|---|---|---|
| 1. | प्रथमा विभक्ति | ने |
| 2. | द्वितीया विभक्ति | को |
| 3. | तृतीया विभक्ति | से, के द्वारा, के साथ |
| 4. | चतुर्थी विभक्ति | के लिए |
| 5. | पंचमी विभक्ति | से (पृथक् होने के भाव में) |
| 6. | षष्ठी विभक्ति | का, के, की |
| 7. | सप्तमी विभक्ति | में, पर |
| 8. | संबोधन | हे, अरे |

# शब्द के रूप

## पुंलिंग शब्दों के रूप

### देव शब्द के रूप

#### देव शब्द ( पुलिंग )

| | | | |
|---|---|---|---|
| प्र० | देवः | देवौ | देवाः |
| द्वि० | देवम् | देवौ | देवान् |
| तृ० | देवेन | देवाभ्याम् | देवैः |
| च० | देवाय | देवाभ्याम् | देवेभ्यः |
| पं० | देवात् | देवाभ्याम् | देवेभ्यः |
| ष० | देवस्य | देवयोः | देवानाम् |
| स० | देवे | देवयोः | देवेषु |
| सं० | हे देव! | हे देवौ! | हे देवाः |

#### पति ( स्वामी, पति )

| | एक व० | द्वि व० | बहु व० |
|---|---|---|---|
| प्र० | पतिः | पती | पतयः |
| द्वि० | पतिम् | पती | पतीन् |
| तृ० | पत्या | पतिभ्याम् | पतिभिः |
| च० | पत्ये | पतिभ्याम् | पतिभ्यः |
| पं० | पत्युः | पतिभ्याम् | पतिभ्यः |
| ष० | पत्युः | पत्योः | पतीनाम् |
| स० | पत्यौ | पत्योः | पतिषु |
| सं० | पते | पती | पतयः |

#### सखि ( मित्र )

| | | | |
|---|---|---|---|
| प्र० | सखा | सखायौ | सखायः |
| द्वि० | सखायम् | सखायौ | सखीन् |
| तृ० | सख्या | सखिभ्याम् | सखिभिः |

| | | | |
|---|---|---|---|
| च० | सख्ये | सखिभ्याम् | सखिभ्यः |
| पं० | सख्युः | सखिभ्याम् | सखिभ्यः |
| ष० | सख्युः | सख्योः | सखीनाम् |
| स० | सख्यौ | सख्योः | सखिषु |
| सं० | सखे | सखायौ | सखायः |

**महत् ( बड़ा ) ( पुंलिंग, विशेषण )**

| | | | |
|---|---|---|---|
| प्र० | महान् | महान्तौ | महान्तः |
| द्वि० | महान्तम् | महान्तौ | महतः |
| तृ० | महता | महद्भ्याम् | महद्भिः |
| च० | महते | महद्भ्याम् | महद्भ्यः |
| पं० | महतः | महद्भ्याम् | महद्भ्यः |
| ष० | महतः | महतोः | महताम् |
| स० | महति | महतोः | महत्सु |
| सं० | महन् | महान्तौ | महान्तः |

**बलवत् ( बलवान् ) ( पुंलिंग, विशेषण )**

| | | | |
|---|---|---|---|
| प्र० | बलवान् | बलवन्तौ | बलवन्तः |
| द्वि० | बलवन्तम् | बलवन्तौ | बलवतः |
| तृ० | बलवता | बलवद्भ्याम् | बलवद्भिः |
| च० | बलवते | बलवद्भ्याम् | बलवद्भ्यः |
| पं० | बलवतः | बलवद्भ्याम् | बलवद्भ्यः |
| ष० | बलवतः | बलवतोः | बलवताम् |
| स० | बलवति | बलवतोः | बलवत्सु |
| सं० | बलवन् | बलवन्तौ | बलवन्तः |

**पठत् ( पढ़ता हुआ ) ( पुंलिंग, विशेषण )**

| | | | |
|---|---|---|---|
| प्र० | पठन् | पठन्तौ | पठन्तः |
| द्वि० | पठन्तम् | पठन्तौ | पठतः |
| तृ० | पठता | पठद्भ्याम् | पठद्भिः |

| | | | |
|---|---|---|---|
| च० | पठते | पठद्भ्याम् | पठद्भ्यः |
| पं० | पठतः | पठद्भ्याम् | पठद्भ्यः |
| ष० | पठतः | पठतोः | पठताम् |
| स० | पठति | पठतोः | पठत्सु |
| सं० | पठन् | पठन्तौ | पठन्तः |

## गच्छत् ( जाता हुआ ) ( पुं०, विशेषण )

| | | | |
|---|---|---|---|
| प्र० | गच्छन् | गच्छन्तौ | गच्छन्तः |
| द्वि० | गच्छन्तम् | गच्छन्तौ | गच्छतः |
| तृ० | गच्छता | गच्छद्भ्याम् | गच्छद्भिः |
| च० | गच्छते | गच्छद्भ्याम् | गच्छद्भ्यः |
| पं० | गच्छतः | गच्छद्भ्याम् | गच्छद्भ्यः |
| ष० | गच्छतः | गच्छतोः | गच्छताम् |
| स० | गच्छति | गच्छतोः | गच्छत्सु |
| सं० | गच्छन् | गच्छन्तौ | गच्छन्तः |

## आत्मन् ( आत्मा )

| | | | |
|---|---|---|---|
| प्र० | आत्मा | आत्मानौ | आत्मानः |
| द्वि० | आत्मानम् | आत्मानौ | आत्मनः |
| तृ० | आत्मना | आत्मभ्याम् | आत्मभिः |
| च० | आत्मने | आत्मभ्याम् | आत्मभ्यः |
| पं० | आत्मनः | आत्मभ्याम् | आत्मभ्यः |
| ष० | आत्मनः | आत्मनोः | आत्मनाम् |
| स० | आत्मनि | आत्मनोः | आत्मसु |
| सं० | आत्मन् | आत्मानौ | आत्मानः |

## करिन् ( हाथी )

| | | | |
|---|---|---|---|
| प्र० | करी | करिणौ | करिणः |
| द्वि० | करिणम् | करिणौ | करिणः |
| तृ० | करिणा | करिभ्याम् | करिभिः |
| च० | करिणे | करिभ्याम् | करिभ्यः |

| | | | |
|---|---|---|---|
| पं | करिण: | करिभ्याम् | करिभ्य: |
| ष० | करिण: | करिणो: | करिणाम् |
| स० | करिणी | करिणो: | करिषु |
| सं० | करिन् | करिणौ | करिण: |

## साधु शब्द के रूप ( पुलिंग )

| | | | |
|---|---|---|---|
| प्र. | साधु: | साधू | साधव: |
| द्वि. | साधुम् | साधू | साधून् |
| तृ. | साधुना | साधुभ्याम् | साधुभि: |
| च. | साधवे | साधुभ्याम् | साधुभ्य: |
| प. | साधो: | साधुभ्याम् | साधुभ्य: |
| ष. | साधो: | साध्वो: | साधूनाम् |
| स. | साधौ | साध्वो: | साधुषु |
| स. | हे साधो! | हे साधू! | हे साधव:। |

## स्त्रीलिंग शब्दों के रूप

### प्रभा = चमक

| | | | |
|---|---|---|---|
| प्र. | प्रभा | प्रभे | प्रभा: |
| द्वि. | प्रभाम् | प्रभे | प्रभा: |
| तृ. | प्रभया | प्रभाभ्याम् | प्रभाभि: |
| च. | प्रभायै | प्रभाभ्याम् | प्रभाभ्य: |
| प. | प्रभाया: | प्रभाभ्याम् | प्रभाभ्य: |
| ष. | प्रभाया: | प्रभयो: | प्रभाणाम् |
| स. | प्रभायाम् | प्रभयो: | प्रभासु |
| सं. | हे प्रभे! | हे प्रभे! | हे प्रभा:! |

### नदी ( नदी, दरिया )

| | | | |
|---|---|---|---|
| प्र० | नदी | नद्यौ | नद्य: |
| द्वि० | नदीम् | नद्यौ | नदी: |
| तृ० | नद्या | नदीभ्याम् | नदीभि: |
| च० | नद्यै | नदीभ्याम् | नदीभ्य: |

| | | | |
|---|---|---|---|
| पं० | नद्याः | नदीभ्याम् | नदीभ्यः |
| ष० | नद्याः | नद्योः | नदीनाम् |
| स० | नद्याम् | नद्योः | नदीषु |
| सं० | नदि | नद्यौ | नद्यः |

## सखी ( सहेली )

| | | | |
|---|---|---|---|
| प्र० | सखी | सख्यौ | सख्यः |
| द्वि० | सखीम् | सख्यौ | सखीः |
| तृ० | सख्या | सखीभ्याम् | सखीभिः |
| च० | सख्यै | सखीभ्याम् | सखीभ्यः |
| पं० | सख्याः | सखीभ्याम् | सखीभ्यः |
| ष० | सख्याः | सख्योः | सखीनाम् |
| स० | सख्याम् | सख्योः | सखीषु |
| सं० | सखि | सख्यौ | सख्यः |

## महती ( बड़ी ) ( स्त्री०, विशेषण )

| | | | |
|---|---|---|---|
| प्र० | महती | महत्यौ | महत्यः |
| द्वि० | महतीम् | महत्यौ | महतीः |
| तृ० | महत्या | महतीभ्याम् | महतीभिः |
| च० | महत्यै | महतीभ्याम् | महतीभ्यः |
| पं० | महत्याः | महतीभ्याम् | महतीभ्यः |
| ष० | महत्याः | महत्योः | महतीनाम् |
| स० | महत्याम् | महत्योः | महतीषु |
| सं० | महति | महत्यौ | महत्यः |

## पठन्ती ( पढ़ती हुई ) स्त्री०, ( विशेषण )

| | | | |
|---|---|---|---|
| प्र० | पठन्ती | पठन्त्यौ | पठन्त्यः |
| द्वि० | पठन्तीम् | पठन्त्यौ | पठतीः |
| तृ० | पठत्या | पठतीभ्याम् | पठतीभिः |
| च० | पठत्यै | पठतीभ्याम् | पठतीभ्यः |
| पं० | पठत्याः | पठतीभ्याम् | पठतीभ्यः |

| | | | |
|---|---|---|---|
| ष० | पठत्याः | पठत्योः | पठतीनाम् |
| स० | पठत्याम् | पठत्योः | पठतीषु |
| सं० | पठन्ति | पठन्त्यौ | पठन्त्यः |

## गच्छन्ती ( जाती हुई ) ( स्त्री०,विशेषण )

| | | | |
|---|---|---|---|
| प्र० | गच्छन्ती | गच्छन्त्यौ | गच्छन्त्यः |
| द्वि० | गच्छन्तीम् | गच्छन्त्यौ | गच्छतीः |
| तृ० | गच्छत्या | गच्छतीभ्याम् | गच्छतीभिः |
| च० | गच्छत्यै | गच्छतीभ्याम् | गच्छतीभ्यः |
| पं० | गच्छत्याः | गच्छतीभ्याम् | गच्छतीभ्यः |
| ष० | गच्छत्याः | गच्छत्योः | गच्छतीनाम् |
| स० | गच्छत्याम् | गच्छत्योः | गच्छतीषु |
| सं० | गच्छन्ति | गच्छन्त्यौ | गच्छन्त्यः |

## वधू शब्द के रूप

## वधू -बहू ( स्त्रीलिंग )

| | | | |
|---|---|---|---|
| प्र० | वधू | वध्वौ | वध्वः |
| द्वि० | वधूम् | वध्वौ | वधूः |
| तृ० | वध्वा | वधूभ्याम् | वधूभिः |
| च० | वध्वै | वधूभ्याम् | वधूभ्यः |
| पं० | वध्वाः | वधूभ्याम् | वधूभ्यः |
| ष० | वध्वाः | वध्वोः | वधूनाम् |
| स० | वध्वाम् | वध्वोः | वधूषु |
| सं० | हे वधु ! | हे वध्वौ! | हे वध्वः ! |

## फल शब्द के रूप

| | | | |
|---|---|---|---|
| प्र० | फलम् | फले | फलानि |
| द्वि० | फलम् | फले | फलानि |
| तृ० | फलेन | फलाभ्याम् | फलैः |
| च० | फलाय | फलाभ्याम् | फलेभ्यः |
| पं० | फलात् | फलाभ्याम् | फलेभ्यः |

| | | | |
|---|---|---|---|
| ष० | फलस्य | फलयोः | फलानाम् |
| स० | फले | फलयोः | फलेषु |
| सं० | हे फलम्! | हे फले | हे फलानि! |

## नपुंसकलिंग शब्दों के रूप

### महत् ( बड़ा ) ( नपुं०, विशेषण )

| | | | |
|---|---|---|---|
| प्र० | महत् | महती | महान्ति |
| द्वि० | महत् | महती | महान्ति |
| तृ० | महता | महद्भ्याम् | महद्भिः |
| च० | महते | महद्भ्याम् | महद्भ्यः |
| पं० | महतः | महद्भ्याम् | महद्भ्यः |
| ष० | महतः | महतोः | महताम् |
| स० | महति | महतोः | महत्सु |
| सं० | महत् | महती | महान्ति |

### पठत् ( पढ़ता हुआ ) ( नपुं०, विशेषण )

| | | | |
|---|---|---|---|
| प्र० | पठत् | पठती | पठन्ति |
| द्वि० | पठत् | पठती | पठन्ति |
| तृ० | पठता | पठद्भ्याम् | पठद्भिः |
| च० | पठते | पठद्भ्याम् | पठद्भ्यः |
| पं० | पठतः | पठद्भ्याम् | पठद्भ्यः |
| ष० | पठतः | पठतोः | पठताम् |
| स० | पठति | पठतोः | पठत्सु |
| सं० | पठत् | पठती | पठन्ति |

### गच्छत् ( जाता हुआ ) ( नपुं०, विशेषण )

| | | | |
|---|---|---|---|
| प्र० | गच्छत् | गच्छती | गच्छन्ति |
| द्वि० | गच्छत् | गच्छती | गच्छन्ति |
| तृ० | गच्छता | गच्छद्भ्याम् | गच्छद्भिः |
| च० | गच्छते | गच्छद्भ्याम् | गच्छद्भ्यः |

| | | | |
|---|---|---|---|
| पं० | गच्छतः | गच्छद्भ्याम् | गच्छद्भ्यः |
| ष० | गच्छतः | गच्छतोः | गच्छताम् |
| स० | गच्छति | गच्छतोः | गच्छत्सु |
| सं० | गच्छत् | गच्छती | गच्छन्ति |

**नामन् ( नाम )**

| | | | |
|---|---|---|---|
| प्र० | नाम | नामनी | नामानि |
| द्वि० | नाम | नामनी | नामानि |
| तृ० | नाम्ना | नामभ्याम् | नामभिः |
| च० | नाम्ने | नामभ्याम् | नामभ्यः |
| पं० | नाम्नः | नामभ्याम् | नामभ्यः |
| ष० | नाम्नः | नाम्नोः | नाम्नाम् |
| स० | नाम्नि,नामनि | नाम्नोः | नामसु |
| सं० | नामन् | नामनी | नामानि |

## सर्वनाम शब्दों के रूप

**युष्मद् ( तू ) ( तीनों लिंगों में एक समान )**

| | | | |
|---|---|---|---|
| प्र० | त्वम् | युवाम् | यूयम् |
| द्वि० | त्वाम् | युवाम् | युष्मान् |
| तृ० | त्वया | युवाभ्याम् | युष्माभिः |
| च० | तुभ्यम् | युवाभ्याम् | युष्मभ्यम् |
| पं० | त्वत् | युवाभ्याम् | युष्मत् |
| ष० | तव | युवयोः | युष्माकम् |
| स० | त्वयि | युवयोः | युष्मासु |

**विशेष**—सर्वनाम शब्दों का संबोधन नहीं होता।

**अस्मद् ( मैं ) ( तीनों लिंगों में एक समान )**

| | | | |
|---|---|---|---|
| प्र० | अहम् | आवाम् | वयम् |
| द्वि० | माम् | आवाम् | अस्मान् |
| तृ० | मया | आवाभ्याम् | अस्माभिः |
| च० | मह्यम् | आवाभ्याम् | अस्मभ्यम् |

| | | | |
|---|---|---|---|
| पं० | मत् | आवाभ्याम् | अस्मत् |
| ष० | मम | आवयोः | अस्माकम् |
| स० | मयि | आवयोः | अस्मासु |

**तत् ( वह ) ( पुंलिंग )**

| | | | |
|---|---|---|---|
| प्र० | सः | तौ | ते |
| द्वि० | तम् | तौ | तान् |
| तृ० | तेन | ताभ्याम् | तैः |
| च० | तस्मै | ताभ्याम् | तेभ्यः |
| पं० | तस्मात् | ताभ्याम् | तेभ्यः |
| ष० | तस्य | तयोः | तेषाम् |
| स० | तस्मिन् | तयोः | तेषु |

**तत् ( वह ) ( स्त्रीलिंग )**

| | | | |
|---|---|---|---|
| प्र० | सा | ते | ताः |
| द्वि० | ताम् | ते | ताः |
| तृ० | तया | ताभ्याम् | ताभिः |
| च० | तस्यै | ताभ्याम् | ताभ्यः |
| पं० | तस्याः | ताभ्याम् | ताभ्यः |
| ष० | तस्याः | तयोः | तासाम् |
| स० | तस्याम् | तयोः | तासु |

**तत् ( वह ) ( नपुंसकलिंग )**

| | | | |
|---|---|---|---|
| प्र० | तत् | ते | तानि |
| द्वि० | तत् | ते | तानि |

**( शेष पुंलिंग के समान )**

**एतत् ( यह ) ( पुंलिंग )**

| | | | |
|---|---|---|---|
| प्र० | एषः | एतौ | एते |
| द्वि० | एतम् | एतौ | एतान् |
| तृ० | एतेन | एताभ्याम् | एतैः |

| | | | |
|---|---|---|---|
| च० | एतस्मै | एताभ्याम् | एतेभ्य: |
| पं० | एतस्मात् | एताभ्याम् | एतेभ्य: |
| ष० | एतस्य | एतयो: | एतेषाम् |
| स० | एतस्मिन् | एतयो: | एतेषु |

**एतत् ( यह ) ( स्त्रीलिंग )**

| | | | |
|---|---|---|---|
| प्र० | एषा | एते | एता: |
| द्वि | एताम् | एते | एता: |
| तृ० | एतया | एताभ्याम् | एताभि: |
| च० | एतस्यै | एताभ्याम् | एताभ्य: |
| पं० | एतस्या: | एताभ्याम् | एताभ्य: |
| ष० | एतस्या: | एतयो: | एतासाम् |
| स० | एतस्याम् | एतयो: | एतासु |

**एतत् ( यह ) ( नपुंसकलिंग )**

| | | | |
|---|---|---|---|
| प्र० | एतत् | एते | एतानि |
| द्वि० | एतत् | एते | एतानि |

**( शेष पुंलिंग के समान )**

**यत् ( जो ) ( पुंलिंग )**

| | | | |
|---|---|---|---|
| प्र० | य: | यौ | ये |
| द्वि० | यम् | यौ | यान् |
| तृ० | येन | याभ्याम् | यै: |
| च० | यस्मै | याभ्याम् | येभ्य: |
| पं० | यास्मात् | याभ्याम् | येभ्य: |
| ष० | यस्य | ययो: | येषाम् |
| स० | यस्मिन् | ययो: | येषु |

**यत् ( जो ) ( स्त्रीलिंग )**

| | | | |
|---|---|---|---|
| प्र० | या | ये | या: |
| द्वि | याम् | ये | या: |

| | | | |
|---|---|---|---|
| तृ॰ | यया | याभ्याम् | याभिः |
| च॰ | यस्यै | याभ्याम् | याभ्यः |
| पं॰ | यस्याः | याभ्याम् | याभ्यः |
| ष॰ | यस्याः | ययोः | यासाम् |
| स॰ | यस्याम् | ययोः | यासु |

**( यत् ) ( जो ) ( नपुंसकलिंग )**

| | | | |
|---|---|---|---|
| प्र॰ | यत् | ये | यानि |
| द्वि॰ | यत् | ये | यानि |

**( शेष पुंलिंग के समान )**

**इदम् ( यह ) ( पुंलिंग )**

| | | | |
|---|---|---|---|
| प्र॰ | अयम् | इमौ | इमे |
| द्वि॰ | इमम् | इमौ | इमान् |
| तृ॰ | अनेन | आभ्याम् | एभिः |
| च॰ | अस्मै | आभ्याम् | एभ्यः |
| पं॰ | अस्मात् | आभ्याम् | एभ्यः |
| ष॰ | अस्य | अनयोः | एषाम् |
| स॰ | अस्मिन् | अनयोः | एषु |

**इदम् ( यह ) ( स्त्रीलिंग )**

| | | | |
|---|---|---|---|
| प्र॰ | इयम् | इमे | इमाः |
| द्वि॰ | इमाम् | इमे | इमाः |
| तृ॰ | अनया | आभ्याम् | आभिः |
| च॰ | अस्यै | आभ्याम् | आभ्यः |
| पं॰ | अस्याः | आभ्याम् | आभ्यः |
| ष॰ | अस्याः | अनयोः | आसाम् |
| स॰ | अस्याम् | अनयोः | आसु |

## इदम् ( यह ) ( नपुंसकलिंग )

| | | | |
|---|---|---|---|
| प्र० | इदम् | इमे | इमानि |
| द्वि० | इदम् | इमे | इमानि |

( शेष पुंलिंग के समान )

## किम् ( कौन ) ( पुंलिंग )

| | | | |
|---|---|---|---|
| प्र० | कः | कौ | के |
| द्वि० | कम् | कौ | कान् |
| तृ० | केन | काभ्याम् | कैः |
| च० | कस्मै | काभ्याम् | केभ्यः |
| पं० | कस्मात् | काभ्याम् | केभ्यः |
| ष० | कस्य | कयोः | केषाम् |
| स० | कस्मिन् | कयोः | केषु |

## किम् ( कौन ) ( स्त्रीलिंग )

| | | | |
|---|---|---|---|
| प्र० | का | के | काः |
| द्वि० | काम् | के | काः |
| तृ० | कया | काभ्याम् | काभिः |
| च० | कस्यै | काभ्याम् | काभ्यः |
| पं० | कस्याः | काभ्याम् | काभ्यः |
| ष० | कस्याः | कयोः | कासाम् |
| स० | कस्याम् | कयोः | कासु |

## किम् ( कौन ) ( नपुंसकलिंग )

| | | | |
|---|---|---|---|
| प्र० | किम् | के | कानि |
| द्वि० | किम् | के | कानि |

( शेष पुंलिंग के समान )

## सर्व ( सब ) पुंलिंग

| | | | |
|---|---|---|---|
| प्र० | सर्वः | सर्वौ | सर्वे |
| द्वि० | सर्वम् | सर्वौ | सर्वान् |

| | | | |
|---|---|---|---|
| तृ० | सर्वेण | सर्वाभ्याम् | सर्वैः |
| च० | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| पं० | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| ष० | सर्वस्य | सर्वयोः | सर्वेषाम् |
| स० | सर्वस्मिन् | सर्वयोः | सर्वेषु |

### सर्व ( सब ) ( स्त्रीलिंग )

| | | | |
|---|---|---|---|
| प्र० | सर्वा | सर्वे | सर्वाः |
| द्वि० | सर्वाम् | सर्वे | सर्वाः |
| तृ० | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| च० | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| पं० | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| ष० | सर्वस्याः | सर्वयोः | सर्वासाम् |
| स० | सर्वस्याम् | सर्वयोः | सर्वासु |

### सर्व ( सब ) ( नपुंसकलिंग )

| | | | |
|---|---|---|---|
| प्र० | सर्वम् | सर्वे | सर्वाणि |
| द्वि० | सर्वम् | सर्वे | सर्वाणि |

( शेष पुंलिंग के समान )

### किम् + चित् तथा किम् + चन

किम् + चित् (कोई, कुछ) तथा किम् + चन (कोई, कुछ) के योग में भी पुंलिंग, स्त्रीलिंग तथा नपुंसकलिंग में 'किम्' शब्द की तरह ही रूप बनेंगे। अर्थ के अनुसार जिस रूप की आवश्यकता हो उस रूप के साथ चन या 'चित्' जोड़ लिया जाता है। जैसे—कश्चन् (कोई), कस्मैचित् (किसी के लिए), कस्यचित् (किसी का), कस्मिंश्चित् (किसी में), कयाचित् [किसी (स्त्री) द्वारा] कस्याश्चित् [किसी (स्त्री) का] आदि।

### तिङन्त ( क्रियापद )

होना, करना, जाना, खाना आदि क्रियाओं से सम्बन्धित पदों को क्रियापद कहते हैं। विभिन्न क्रियाओं को सूचित करने वाले शब्द के मूल रूप को धातु कहते हैं।

इस प्रकार क्रियापद बनाने के लिए उनमें लगाए जाने वाले प्रत्ययों को तिङ् प्रत्यय कहते हैं। अतएव क्रियापदों को तिडन्त रूप कहते हैं।

संस्कृत में समस्त धातुओं को दस गणों में विभक्त किया गया है। ये गण हैं, भ्वादि, अदादि, जुहोत्यादि, दिवादि, स्वादि, तुदादि, रुधादि, तनादि, क्रियादि और चुरादि। पाठ्य-क्रम के अनुसार यहां भ्वादि, दिवादि, तुदादि और चुरादि गणों की कतिपय धातुओं के रूप दिए जाएंगे।

प्रत्येक गण की धातुओं में कई धातुएं परस्मैपदी, कई आत्मनेपदी और कुछ उभयपदी (दोनों पदों की) होती है। इनकी रूप-रचना में अन्तर होता है।

क्रिया के तीन काल (Tenses)—वर्तमान काल, भूत काल और भविष्यत् काल—तथा कुछ वृत्तियां या भाव (moods) —जैसे—आज्ञाभाव, विधिभाव होते हैं। इन कालों और भावों को प्रकट करने के लिए भिन्न-भिन्न लकार होते हैं एवं उन लकारों में धातुओं के विभिन्न रूपों की रचना होती है। उक्त तीन कालों और दो भावों से सम्बन्धित पांच मुख्य लकार ये हैं :

| लकार | अर्थ | उदाहरण (एकवचन में) |
|---|---|---|
| लट् लकार | वर्तमान काल | पठति (वह पढ़ता है) |
| लङ् लकार | भूतकाल | अपठत् (उसने पढ़ा) |
| लृट् लकार | भविष्यत् काल | पठिष्यति (वह पढ़ेगा) |
| लोट् लकार | आज्ञाभाव | पठतु (वह पढ़े) |
| विधिलिङ् | विधिभाव | पठेत् (वह पढ़े, उसे पढ़ना चाहिए) |

बातचीत करने में तीन व्यक्ति सम्बन्धित होते हैं—(1) बातें करने वाला, (2) वह जिससे बातें की जाती हैं, तथा (3) वह जिसके बारे में बातें की जाती है। इन्हें व्याकरण में 'पुरुष' (Persons) कहते हैं। इनके नाम ये हैं —

| पुरुष | अर्थ | उदाहरण (एकवचन में) |
|---|---|---|
| प्रथम पुरुष | जिसके बारे में बातें की हैं | सः (वह) |
| मध्यम पुरुष | वह जिससे बातें की जाती हैं | त्वम् (तू) |
| उत्तम पुरुष | बातें करने वाला | अहम् (मैं) |

नाम-पदों के समान, क्रियापदों में भी एक के लिए एकवचन, दो के लिए

द्विवचन तथा तीन या तीन से अधिक के लिए बहुवचन का प्रयोग किया जाता है।

यहां पाठ्य-क्रम में निर्धारित धातुओं के पांच लकारों में, तीनों पुरुषों और तीनों वचनों में रूप दिए जा रहे हैं —

## ( क ) भ्वादिगण, परस्मैपद

### √ गर्ज् = गरजना

### लट् लकार ( वर्तमान काल )

| | एक० | द्वि० | बहु० |
|---|---|---|---|
| प्रथम पुरुष | गर्जति | गर्जतः | गर्जन्ति |
| मध्यम पुरुष | गर्जसि | गर्जथः | गर्जथ |
| उत्तम पुरुष | गर्जामि | गर्जावः | गर्जामः |

### लङ् लकार ( भूतकाल )

| | | | |
|---|---|---|---|
| प्र० | अगर्जत् | अगर्जताम् | अगर्जन् |
| म० | अगर्जः | अगर्जतम् | अगर्जत |
| उ० | अगर्जम् | अगर्जाव | अगर्जाम |

### लृट् लकार ( भविष्यत् काल )

| | | | |
|---|---|---|---|
| प्र० | गर्जिष्यति | गर्जिष्यतः | गर्जिष्यन्ति |
| म० | गर्जिष्यासि | गर्जिष्यथः | गर्जिष्यथ |
| उ० | गर्जिष्यामि | गर्जिष्यावः | गर्जिष्यामः |

### लोट् लकार ( आज्ञा-भाव )

| | | | |
|---|---|---|---|
| प्र० | गर्जतु | गर्जताम् | गर्जन्तु |
| म० | गर्ज | गर्जतम् | गर्जत |
| उ० | गर्जानि | गर्जाव | गर्जाम |

### विधिलिङ् ( विधि-भाव )

| | | | |
|---|---|---|---|
| प्र० | गर्जेत् | गर्जेताम् | गर्जेयुः |
| म० | गर्जेः | गर्जेतम् | गर्जेत |
| उ० | गर्जेयम् | गर्जेव | गर्जेम |

## √ सृ ( सर् ) = सरकना

### लट् लकार

| | | | |
|---|---|---|---|
| प्र० | सरति | सरतः | सरन्ति |
| म० | सरसि | सरथः | सरथ |
| उ० | सरामि | सरावः | सरामः |

### लङ् लकार

| | | | |
|---|---|---|---|
| प्र० | असरत् | असरताम् | असरन् |
| म० | असरः | असरतम् | असरत |
| उ० | असरम् | असराव | असराम |

### लृट् लकार

| | | | |
|---|---|---|---|
| प्र० | सरिष्यति | सरिष्यतः | सरिष्यन्ति |
| म० | सरिष्यसि | सरिष्यथः | सरिष्यथ |
| उ० | सरिष्यामि | सरिष्यावः | सरिष्यामः |

### लोट् लकार

| | | | |
|---|---|---|---|
| प्र० | सरतु | सरताम् | सरन्तु |
| म० | सर | सरतम् | सरत |
| उ० | सराणि | सराव | सराम |

### विधिलिङ्

| | | | |
|---|---|---|---|
| प्र० | सरेत् | सरेताम् | सरेयुः |
| म० | सरेः | सरेतम् | सरेत |
| उ० | सरेयम् | सरेव | सरेम |

## √ तृ ( तर् ) = तैरना

### लट्

| | | | |
|---|---|---|---|
| प्र० | तरति | तरतः | तरन्ति |
| म० | तरसि | तरथः | तरथ |
| उ० | तरामि | तरावः | तरामः |

## लङ्

| | | | |
|---|---|---|---|
| प्र० | अतरत् | अतरताम् | अतरन् |
| म० | अतरः | अतरतम् | अतरत |
| उ० | अतरम् | अतराव | अतराम |

## लृट्

| | | | |
|---|---|---|---|
| प्र० | तरिष्यति | तरिष्यतः | तरिष्यन्ति |
| म० | तरिष्यसि | तरिष्यथः | तरिष्यथ |
| उ० | तरिष्यामि | तरिष्यावः | तरिष्यामः |

## लोट्

| | | | |
|---|---|---|---|
| प्र० | तरतु | तरताम् | तरन्तु |
| म० | तर | तरतम् | तरत |
| उ० | तराणि | तराव | तराम |

## विधिलिङ्

| | | | |
|---|---|---|---|
| प्र० | तरेत् | तरेताम् | तरेयुः |
| म० | तरेः | तरेतम् | तरेत |
| उ० | तरेयम् | तरेव | तरेम |

## भ्वादिगण आत्मनेपद

## √ लभ् ( पाना )

| | | | |
|---|---|---|---|
| प्र० | लभते | लभेते | लभन्ते |
| म० | लभसे | लभेथे | लभध्वे |
| उ० | लभे | लभावहे | लभामहे |

## लङ्

| | | | |
|---|---|---|---|
| प्र० | अलभत | अलभेताम् | अलभन्त |
| म० | अलभथाः | अलभेथाम् | अलभध्वम् |
| उ० | अलभे | अलभावहि | अलभामहि |

### लृट्

| | | | |
|---|---|---|---|
| प्र० | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| म० | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| उ० | लप्स्ये | लप्स्यावहे | लप्स्यामहे |

### लोट्

| | | | |
|---|---|---|---|
| प्र० | लभताम् | लभेताम् | लभन्ताम् |
| म० | लभस्व | लभेथाम् | लभध्वम् |
| उ० | लभै | लभावहै | लभामहै |

### विधिलिङ्

| | | | |
|---|---|---|---|
| प्र० | लभेत | लभेयाताम् | लभेरन् |
| म० | लभेथा: | लभेयाथाम् | लभेध्वम् |
| उ० | लभेय | लभेवहि | लभेमहि |

## √ सेव् [ सेवा करना ]

| | | | |
|---|---|---|---|
| प्र० | सेवते | सेवेते | सेवन्ते |
| म० | सेवसे | सेवेथे | सेवध्वे |
| उ० | सेवे | सेवावहे | सेवामहे |

### लङ्

| | | | |
|---|---|---|---|
| प्र० | असेवत | असेवेताम् | असेवन्त |
| म० | असेवथा: | असेवेथाम् | असेवध्वम् |
| उ० | असेवे | असेवावहि | असेवामहि |

### लृट्

| | | | |
|---|---|---|---|
| प्र० | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| म० | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उ० | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

### लोट्

| | | | |
|---|---|---|---|
| प्र० | सेवताम् | सेवेताम् | सेवन्ताम् |
| म० | सेवस्व | सेवेथाम् | सेवध्वम् |
| उ० | सेवै | सेवावहै | सेवामहै |

### विधिलिङ्

| | | | |
|---|---|---|---|
| प्र० | सेवेत | सेवेयाताम् | सेवेरन् |
| म० | सेवेथाः | सेवेयाथाम् | सेवध्वम् |
| उ | सेवेय | सेवेवहि | सेवेमहि |

### √ वृत् ( वर्तमान होना )

| | | | |
|---|---|---|---|
| प्र० | वर्तते | वर्तेते | वर्तन्ते |
| म० | वर्तसे | वर्तेथे | वर्तध्वे |
| उ० | वर्ते | वर्तावहे | वर्तामहे |

### लङ्

| | | | |
|---|---|---|---|
| प्र० | अवर्तत | अवर्तेताम् | अवर्तन्त |
| म० | अवर्तथाः | अवर्तेथाम् | अवर्तध्वम् |
| उ० | अवर्ते | अवर्तावहि | अवर्तामहि |

### लृट्

| | | | |
|---|---|---|---|
| प्र० | वर्तिष्यते | वर्तिष्येते | वर्तिष्यन्ते |
| म० | वर्तिष्यसे | वर्तिष्येथे | वर्तिष्यध्वे |
| उ० | वर्तिष्ये | वर्तिष्यावहे | वर्तिष्यामहे |

